# ॥ प्रकृतिविलासः ॥

BY

MAHAMAHOPADHYAYA, PANDITARAJA

K. S. KRISHNAMURTI SASTRI

*Poet Laureate in Sanskrit*

*(Madras State)*

SHS

Mahamahopadhya K. S. Krishnamurti Sastri, Poet laureate, 5A/5 North Veli Street, Madurai (Madras)

21-41

॥ श्रीः ॥

# ॥ प्रकृतिविलासः ॥

# PRAKRTI VILASA

## (NATURE'S DISPLAY)

WITH A FOREWORD BY

THE HON'BLE SRI P. V. RAJAMANNAR

Chief Justice, High Court of Judicature, Madras.

BY

MAHAMAHOPADHYAYA PANDITARAJA

K. S. KRISHNAMURTI SASTRI

*(Poet-Laureate in Sanskrit, Madras State)*

Author of Sati Vilasa, Bharata Suprabhata, Mahatma Vijaya, Stavaratnatraya, Gadyaramacharita etc.

980

SAS.

Sa 8K

KKIS

422

787

PRINTED AT

THE KALYAN PRESS, TIRUCHIRAPALLI.

1950

Price Rs. 2-0-0 ] [ मूल्यम् रूप्यकद्वयम्

Bharatiya Vidya Bhawan's S... Sanskrit Ma...

॥ श्रीमते रामानुजाय नमः ॥

श्रीमत्परमहंसपरिव्राजकाचार्योभयवेदान्तप्रतिष्ठापनाचार्यैः श्रीमद्रामानुजापरावतार श्रीमद्वरवरमुनीन्द्राष्टदिग्गजप्रथमपरिगणितैः श्रीमद्रम्यजामातृयतिवरकृपालब्ध श्रीवरमङ्कासमेत श्रीदेवनायकान्तरङ्गकैङ्कर्यैकधुरन्धरैः अखण्डमहीमण्डलालंकारमहीपाल कोटीरकोटिघटितमणिकिरणपटलपाटलितपादपीठपर्यन्ताचार्यैः परमपुरुषार्थलक्षणविलक्षणमोक्षैकप्रयोजनार्थ पञ्चकज्ञानैकसाधन श्रीमदष्टाक्षरादिरहस्यत्रयजगदुज्जीवनाचार्यैः सकलमुनिजनमानसारविन्दसन्दोहसमुल्लाससमुल्लसित श्रीराजहंसावतारैः श्रीभगवद्रामानुजसिद्धान्तनिर्धारकाचार्यसार्वभौमैः सर्वतन्त्रस्वतन्त्रैः

## श्रीतोताद्रिरामानुजयतीन्द्रैः वितीर्णेयमभिनन्दनपत्रिका ॥

मधुरानगरीविराजमान श्रीरामेश्वरदेवस्थानसंस्कृतकलाशालायां प्रधानव्याकरणाध्यापकपदमधिवहतः पण्डितवरस्य मद्रप्रान्तीय राजकीयास्थानकविपदभाजो महामहोपाध्यायस्य कृष्णमूर्तिशास्त्रिणः कृतिं प्रकृति-विलासाभिधानां श्रुत्वा वयं नितरां प्रहृष्यामः । प्राचीनानां महाकवीनां सरणिमनुरुन्धाना श्लेषादिगुणसमलङ्कृता चास्य शैली सर्वेषामपि सहृदयानां हृदयान्यावर्जयेदिति विश्वसिमः । श्रीमन्नारायणस्मरणपूर्वकमाशास्महे चास्य वाग्विलास उत्तरोत्तरमभिवर्धतामिति ॥

| | |
|---|---|
| विकृतिनामसंवत्सरे<br>कटकमासि प्रथमदिवसः<br>रविवारः<br>१६—८—५० | श्रीरामानुजन् |

## विषयानुक्रमः ।


| क्रमसंख्या | विषयः | पुटसंख्या |
|---|---|---|
| १. | सारस्वतसर्वस्वम्<br>Grandeur of the Ocean | 1 |
| २. | काननकामनीयकम्<br>Sylvan Beauty | 17 |
| ३. | पर्वतपारम्यम्<br>Greatness of the Mountain | 33 |
| ४. | समीरसमर्हणम्<br>Homage to the Wind | 49 |
| ५. | त्रिपथगासौभाग्यम्<br>The Charm of the Ganga | 65 |
| ६. | द्विजराजसाम्राज्यम्<br>The Empire of the Moon | 81 |
| ७. | प्रभाकरप्रभावः<br>The Splendour of the Sun | 97 |
| ८. | शार्वरीसौन्दर्यम्<br>Glory of the Night | 113 |

## Author's Note.

For many years my poetical compositions are being published in Sanskrit journals. As a result of the encouragement given by the Madras Government I have not only been inspired to greater poetical effort in the cause of Sanskrit but also to bring together my published poems in book-form. I am deeply indebted to the Madras Government for their kind encouragement.

In the present volume, I publish the Prakriti Vilasam. Other works of mine will be published in subsequent volumes. My respectful thanks are due to His Holiness Sri (1008) Ramanuja Jeer Swamigal of Vanamamalai Math, Nanguneri, who has been pleased to bless this venture with a Srimukham and also to meet the major portion of the cost of its publication. The Hon'ble Sri P. V. Rajamannar, Chief Justice of Madras High Court, has done me a great honour by writing a foreword to this volume. I thank him for the same. I am also indebted to Sri Parikshit Tamburan, Prince of Cochin and Dr. C. S. Venkateswaran M.A., Ph. D., of the Annamalai University who have been so good as to permit me to publish their appreciation of this work. Sri N. Swaminatha Sarma, Retired Health Officer, now at Vishnupuram, Tanjore Dt., has, with his usual generosity, contributed liberally for publishing my works, and to him I express my sincere feelings of gratefulness.

My thanks are also due to Sri Srinivasa Raghunatha Acharya who has been publishing my poems in Telugu characters at Warangal, Hyderabad. The unbounded kindness thus extended to me by several well-wishers has impelled me to dedicate myself to the cause of Sanskrit-learning and also to publish my collected works.

My special thanks are due to my old student, Sri P. K. Nagaratna Sarma, Sanskrit Pandit, S. M. High School, Tiruchi and Sri A. Subrahmanyam M. A., Lecturer in Sanskrit, St. Josephs' College, Tiruchi, who have been very helpful in seeing the book through the press. In spite of the great care exercised by them in correcting the proofs, some errors have crept in and I regret them.

Lastly I must express my heart-felt thanks to the Proprietor of the Kalyan Press, Tiruchi, who has shown great enthusiasm in bringing out the work in such short time and in such excellent form.

I pray that my endeavours may be crowned with success.

Madhurai,
4-8-50.

**K. S. Krishnamurthi Sastri**

# FOREWORD

I think it really presumptuous on my part to write a foreword to the KAVYA of such a reputed scholar and poet like Mahamahopadhyaya K. S. Krishnamurti Sastrigal. Persons far more competent than myself have extolled his mastery of the Sanskrit Language and the beauty of his poetical style. The Government have recognised his merit in making him the Poet Laureate in Sanskrit.

Though the works of the ancient poets abound in descriptions of nature so far as I am aware, there is no work (except probably Kalidasa's Ritusamhara) whose subject-matter is exclusively the beauties of nature. The 'Prakriti Vilasa' is such a work, as the title itself indi- cates. The Kavya is divided into several sections with special titles like 'Kananakamaneeyakam', 'Parvata-paramyam' and 'Sameera Samarhanam' according to the particular aspect of the beauty in nature. There is running through the entire work a passionate, sensitive and I would add, a reverential appreciation of all that is beautiful in nature. The poet has no prejudices. His emotional capacity is large enough to comprehend the majesty of the sea, the fascination of the forest, the gran- deur of the mountain, the glory of the sun and the loveliness of the moon.

Though the main theme is natural scenery, the Kavya is full of brilliant epigrams on human conduct and the affairs of the world. Often he relates the facts of

nature to human life, and this correlation is very illuminating.

One finds in the Kavya strewn with lavishness, rich imagery, suggestive similes and penetrating observation. In another work of the author, Sri Bharata Suprabhata, I find the following:—

"नायं समयः श्लोकमपूर्वं रचयितुम् । शताब्देऽस्मिन्प्रकृतिवर्णने भवभूतिवज्जयशीलस्स एव भवति कृष्णमूर्तिः ।"

I am sure all readers will echo this statement. This is a work which will enable every Sahridaya to enjoy *Ananda*.

Madras,<br>May, 13; 1950.

P. V. RAJAMANNAR.<br>*Chief Justice.*

---

PAREEKSHIT TAMBURAN,
PRINCE OF COCHIN

PALACE No. 16.
TRIPUNITTURA.
5th July, 1945.

To

PANDITARAJA K. S. KRISHNAMOORTI SASTRY.

*Dear Sastry,*

Allow me to thank you sincerely for kindly giving me an opportunity to read your excellent poems including the Prakriti Vilasa Kavya. The spontaneous flow of beautiful expressions is simply wonderful. Apart from deriving aesthetic pleasure, a close student of these poems will greatly benefit by coming in contact with rare and interesting grammatical usages. The descriptions generally are such as will appeal even to a reader whose views on literature are influenced by modern criticisms.

You have adorned Sri Saraswathi Devi with many gems and I feel confident that the Goddess and her devotees will bless you and appreciate your future services at her altar.

Thanking you once more,

I remain,
Yours sincerely,
RAMAVARMA.

## ॥ अभिनन्दनम् ॥

---

वर्ण्यः कथन्नु विदितः सकलेऽपि देशे
श्रीकृष्णमूर्तिसुकविर्मम वाग्भिराभिः ।
सौन्दर्यसंपदमभून्मधुनैव येन
प्रज्ञाधनेन गमिता कवितावनश्रीः ॥ १ ॥

सौहार्दमुन्मिषतु सत्कविवर्य ! नित्यं
मात्सर्यदोषविधुरं मधुरं दृढञ्च ।
येनावयोः सुरगवीपरिपोषणेन
संपद्यतेऽभिलषितः कृतकृत्यभावः ॥ २ ॥

काञ्चिद्गुणत्रयजुषं प्रकृतिं पुराणः
क्रीडारसेन पुरुषः ससिसृष्टु कामम् ।
श्रीकृष्णमूर्तिकविना रचितः प्रमोदं
धत्तेऽमितं, बहुगुणः प्रकृतेर्विलासः ॥ ३ ॥

S. N. C. Srinivasa Ragunadha Acharya.
WARANGAL.
N. S. RY.

---

# CRITICAL APPRECIATION

BY

**Dr. C. S. VENKATESWARAN M. A., Ph. D.,**

PROFESSOR OF SANSKRIT, ANNAMALAI UNIVERSITY,

ANNAMALAINAGAR.

---

The **Prakritivilasakavyam** of Mahamahopadhyaya Panditaraja K. S. Krishnamoorthy Sastrigal, Poet-Laureate in Sanskrit, is an exquisite collection of Nature Poems in Sanskrit. The poet depicts in eight sections of 61 verses each, the beauty of different Natural phenomena in their varied aspects.

1. The **Sarasvatasarvasvam** describes the greatness and grandeur of the ocean in a style and metre reminiscent of Kalidasa's Meghasandesa.

The words are addressed to the ocean by a lover of Nature who was enjoying the cool evening breeze on the beach at Cape Comerin (Kanya Kumari). Expressing this idea in the words:—

हर्षोद्रेकादुदधिमवदत्सोऽपि सम्बोध्य शश्व-
द्वेदं पश्येन्न रसिकजनश्चेतनाचेतनेषु ॥

the poet reminds us of the lines in the Meghasandesa,

इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृति ( प्रणय ) कृपणाश्चेतनाचेतनेषु ॥

The poet reveals his powers of observation when he describes the golden-haired, rosy-cheeked European ladies moving freely on the beach, enjoying the cool evening breeze.

There is a touch of humour when he refers to the attitude of some timid people who dare not step into the waters for a dip on the specious plea that they are unfit to drink.

The natural position of the ever-sounding ocean below and the calm sky above is utilised by the poet to moralise that silence makes for a high position of respect and loquacity for loss of dignity.

उच्चस्थानं जगति भजते मौनमालम्बमानो
व्यर्थालापैर्व्रजति सुमहानप्यधस्तादवस्थाम् ॥

The unchanging ocean which does not transgress its bounds though passing through the ever-changing Time, is represented here as a master, rich in self-control. Thus the remark, धीरो लोके न हि विकुरुते जातुचित्कारणेषु reminds us of Kalidasa's reference to Lord Siva in Kumarasambhava, विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।

Again the warning given to the ocean not to terrify the courting rivers by its deafening sound on the ground that women are timid by nature,

"शब्दैरेतैः श्रुतिकटुतरैर्मूढ ! मा भीषयस्व
स्त्रीणां भीरूण्यबलहृदयान्यन्तरेणैव हेतुम्"

reminds the reader at once of the Yaksha's warning to the cloud in the Meghasandesa

तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः,

and of Udayana's remarks about Padmavati and feminine timidity in the Svapnavasavadatta

कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ।

While commenting upon the just alliance which the noble ocean formed by giving 'his' daughter Lakshmi in marriage to Lord Vishnu, the poet expresses the pregnant truth that alliance between the great is welcome to all-

" सद्भिस्सङ्गो भवति हि सतां सर्वसंप्रीणनाय ".

2. Sylvan beauty in its varied aspects finds apt expression in Kananakamaniyakam. The simple sweet style which one notices here truly takes after Kalidasa's Muse. The theme affords the poet ample scope for exhibiting his descriptive power.

One cannot fail to see the charming poetic fancy in the description of the tender creepers, sounding with the humming bees, smiling with a wealth of flowers and flushing with a profusion of tender red sprouts as embracing the mango trees-

प्रक्रान्तचाटुवचनाः प्रणदद्द्विरेफैः
पुष्पोद्गमैश्च रुचिरैः कृतमन्दहासाः ।
रक्तैर्भृशङ्किसलयैरनुरागपूर्णाः
पर्यष्वजन्त लतिकास्सहकारवृक्षान् ॥

Fertile imagination is manifest when the poet conceives that the birds are placing groups of wing-less glow-worms in their nests at night for serving as lamps by dispelling the natural gloom.

नीडोदरेषु तिमिरं निशि मा प्रसाङ्क्षी-
दित्याकलय्य निजचञ्चुपुटैश्शकुन्ताः ।
कृत्वा च्छदैर्विरहितात्रजनीमुखान्ते
खद्योतकीटनिवहान्बत ! निक्षिपन्ति ॥

Naturalness abounds where the sylvan sites are described as spotted with mountains in different directions as thickly over-grown with shady trees as mantled over with green lairs and blue lakes and as having the deer moving here and there.

उच्चावचाचलसमाकुलदिङ्मुखानि
च्छायाद्रुमैरविरलैर्निचुलीकृतानि ।
स श्यामशाद्वलसरोवरमेदुराणि
कीर्णान्यवाप हरिणैश्च वनस्थलानि ॥

3. The theme of Parvataparamyam is the imposing grandeur of the Mahendra mountain described by one who is lost in its natural beauty.

गिरिं दर्शं दर्शं भुवनमपि विस्मृत्य सपदि
द्विजस्संत्रोध्यैवं किमपि किमपि स्वैरमवदत् ।

The row of mountains with its verdure of creepers and trees bearing a wealth of variegated flowers appears

to the poet's imagination as dressed in a green silken robe and as decked with an ornament of multi-coloured gems.

वसानेव स्निग्धं हरितरुचि वासो विलससि
प्ररूढैस्त्वय्यल्पेतरविटपिवीरुत्समुदयैः ।
प्रसूनैरुत्फुल्लैर्हृदयहरवर्णैरिव मणि-
प्रभेदैराकल्पं कलयसि च माले ! शिखरिणाम् ॥

While making the significant statement that a person short of patience is not fit to be a father-in-law, the poet advises the Mahendra mountain, the source of rivers that woo the ocean Lord, not to lose patience over the ever-roaring sound of the ocean in front.

क्षमाहीनो नैव श्वशुरपदमध्यासितुमलम् ॥

There is sublime beauty in the conception that the Mahendra mountain combines in itself the splendour of the Himadri [snow-white Himalaya] and the Hemadri [Golden mountain, Meru], thanks to the white fleeing clouds hanging above and the yellow creepers growing on it.

कचिच्छुभ्रैरभ्रैः क्वचन परिपिङ्गव्रततिभि-
र्हिमाद्रिं हेमाद्रिं युगपदनुकर्तुं प्रभवसि ।

4. Samirasamarhanam is a tribute paid to the wind. The poet's fertile fancy expresses itself in representing the wind as trying to propitiate the golden creepers on the river bank......the creepers decked with flowers, bending slightly with the mellowing fruits tasted by the amorous bees and charming in their flushing beauty.

कुसुमसुभगाः स्तोकं नम्राः फलैश्च पचेळिमैः
रसिकमधुपाख्याद्या रागश्रिया हृदयङ्गमाः ।
मृदुळपुळिना भोगान्प्राप्ता भृशं प्रियदर्शनाः
कनकलतिकाः कूले सिन्धोर्धिनोषि समीरण ॥

The poet avails himself of an opportunity to commend the life of beings in the airy forests and villages and condemn the life in the congested city where people go for lure of gold.

श्वसन ! सुखिनस्तिर्यञ्चोऽपि ह्यरण्यनिवासिनः
किमधिकगिरा त्वामासेव्य द्रुमा अपि निर्मलम् ।
स्वसुखविमुखा मर्त्यास्त्वेते कुतर्कशतप्रिया
न जहति पुरं प्राणापायेऽप्यधर्मपरायणाः ॥

5. The beauty of the Ganges is described in Tripathagasaubhagyam.

Couched in an attractive metre, the language, like the current of the river flows slowly, but steadily creating an agreeable jingling sound. There is appealing alliteration in-

हिमाद्रिवरनन्दिनीमखिललोचनानन्दिनी-
मुपेन्द्रपदवन्दिनीमसमदृक्शिरस्यन्दिनीम् ।
अघौघपरिमर्दिनीं सुभगभङ्गसन्नर्दिनीम्
त्रयीविपिनकेकिनीं प्रणिपतामि मन्दाकिनीम् ॥

No less charming is the blending of the waters of the Ganges and the Brahmaputra thus described-

अभङ्गुरतरङ्गया महिमभिर्भृशं तुङ्गया
 कृपालसदपाङ्गया हरिपदांबुजासङ्गया ।
वितीर्णभवभङ्गया श्रितवतां, तया गङ्गया
 मिळत्यमितकौतुकात् कचन धातृपुत्रा नदी ॥

6. **Dvijaraja Samrajyam** deals with lunar beauty. The poet beautifully conceives the moon as a big white lotus floating in the vast lake of the sky and representing the nature's immaculate charm, the dark speck within is due to the presence of the bees which have gathered to taste the honey.

गगनसुममसिद्धं सङ्गिरन्तां विमूढा
 वियदतुलसरस्यां श्वेतमब्जं सुजातम् ।
प्रकृतिवरपुरन्ध्र्यास्सर्वसौन्दर्यसारम्
 रसिकमधुपगर्भं मूर्तमाचक्ष्महे त्वाम् ॥

Both poetic fancy and wordly wisdom are revealed when the poet posits the father-son relationship between the ocean and the moon and says that the heart of the ocean buoys up with fatherly pride and joy at the sight of the moon reigning supreme in the sky; for nothing makes the father happier than the prosperity of his son.

7. The brilliance of the Sun—the visible Lord of the Universe-forms the theme of **Prabhakara Prabhava**.

The bright setting sun descending into the ocean is conceived by the poet as a colossal red-hot iron ball falling into the ocean to dry up its waters, as the shining crest jewel of Goddess Nature dropped down during her

customary creative dance, as the embodiment of the intense love of the Lady of the Western Quarter and as the transformation of the merits of good people.

किं तप्तायसपिण्ड एष जलधिं शुष्कं विधातुं पत-
　　त्याहोस्वित्प्रकृतेश्शिरोमणिरयं नृत्यात्स्वयं प्रच्युतः ।
किं वा मूर्ततरोऽनुरागनिकरो नङ्क्ष्यन्प्रतीच्याः स्त्रियः
　　किं वा पुण्यफलं महत्परिणतं सत्कर्मिणां द्योमणे ॥

महति च सुखमवर्त्मन्याधिपत्यं दधानं
　　प्रियतनयमुदन्वान्यामिनीनायक ! त्वाम् ।
मुदितहृदनुपश्यन्नूर्मिभिर्वर्धतेऽसौ
　　न हि सुखमिह पुत्रश्रेयसोऽन्यत्पितॄणाम् ॥

8. SARVARISAUNDARYAM depicts Night's innate charm.

The quiet night, like a sovereign balm, soothes tired nerves by promoting sweet sleep and infuses life into beings. The poet reveals his soaring imagination when he describes the Night as a descending row of black glossy clouds surcharged with the waters of the atmospheric ocean which is rich in the pearls of stars.

तारामुक्ताप्रकरमधुराद्व्योमनाम्नोऽस्तसीम्नः
　　सौन्दर्याब्धेरनुपमरसं कण्ठदघ्नं पिबन्ती ।
उच्चस्थानादतिगुरुतया संपतन्ती समन्ता-
　　न्माला कापि स्फुरति नु तमश्छद्मना वारिदानाम् ॥

Equally bold is the conception that Mother-Night fondly embraces at night her daughters, namely the masses of darkness which, by day, had been hiding themselves in the caves and trees being afraid of the sun.

मातृप्रेम्णः किमपि न परं श्रेयसे कामनार्हम् ॥

Creative fancy is again evident in the portrayal of the night as a dense net-work of chains of fresh shining steel provided by Nature for linking Earth and Heaven

प्रत्नत्वेनाञ्जनपरिचयाच्छ्यामलस्निग्धमूर्तिः
सान्द्रा कालायसकृतबृहच्छृङ्खलामालिका या ।
सन्धातुं द्यामपि वसुमतीं कल्पिता श्रीप्रकृत्या
सैवास्माकं स्फुरति परितः शर्वरीकैतवेन ॥

The busy nights of the city rendered gay by musical concerts, dance and religious discourses are contrasted with the calm nights of the village conducive to sweet sleep and longevity.

श्लिष्टं स्निग्धैर्मुरजनिनदैर्गीतमेकत्र रात्रौ
वंशीकृत्यं क्वचिदपरतो नर्तनं वारनार्याः ।
दाण्डाः क्रीडाः क्वचन विविधास्सत्कथानां प्रसङ्गा
इत्थं नित्योत्सवबहुमितं पत्तनं किं न रम्यम् ॥
सत्यप्येवं विमलमनिलं सर्वतश्चेक्षुसार-
स्पर्धीन्यंबून्युचितमशनं भङ्गहीनां सुषुप्तिम् ।
लब्ध्वा चिन्तालवविरहिताः स्वस्वकृत्यानुरक्ता
जीवन्त्यब्दाञ्शतमपि समे ग्रामवासेन धन्याः ॥

The poet depicts as charming everything that is of the Night—the moon with its speck and light, and the pervading darkness—and concludes with optimism that nothing in Nature lacks beauty.

रम्यश्चन्द्रस्तदुदरभवं लाञ्छनञ्चापि रम्यम्
ज्योत्स्ना रम्यावनिपरिसरे तत्प्रसारोऽपि रम्यः ।
रम्यास्तम्यः सरसमनसामन्धकारोऽपि रम्यः
किन्नैकोक्त्या प्रकृतिविहितं वस्तु नैवास्त्यरम्यम् ॥

The author evinces considerable mastery over his art in the choice and naming of the themes, in the use of the metres and in the descriptions with refreshing variety. The poems are marked by the author's keen observation of natural phenomena, insight into the working of the human heart and power of expressing eternal truths in apt language. The poet-scholar has demonstrated in his work that he can be at home equally with the simple Kalidasan style and the erudite styles of Bhavabhuti, Bhatti and Sri Harsha. This collection of his early poems clearly brings out the natural poetic talents of the Poet-Laureate; it also assures him an honoured place among the Nature-poets in Sanskrit.

Mahamahopadhyaya K. S. KRISHNAMURTI SASTRI

॥ श्रीः ॥

# प्रकृतिविलासकाव्ये

## सारस्वतसर्वस्वं नाम

## प्रथमो विलासः ॥

---

स्वरूपज्योतिर्या निधनरहिता वागिह परा
निजोपास्त्यासभ्यं ध्रुवममरभावं वितरति ।
विवर्तो यस्याश्च स्फुरति भुवि भाषासमुदयः
प्रसन्ना ब्राह्मी सा सुरसुरभिरुच्चैर्विजयताम् ॥

---

सत्यो देवस्स दिशतु वचश्शुद्धिमाम्नायसिद्धः
संसेवन्ते यमभिदधतस्सि[1]न्धवस्सप्त नित्यम् ।
शब्दार्थात्मा स्फुरति सकलो यद्विवर्तः प्रपञ्चः
स्फोटं ब्रह्मास्थिषत मुनयो यं प्रमाणैः पुराणाः ॥ १ ॥

कश्चिद्विद्याविनयसुभगस्स्वां विहायापि वृत्तिं
पक्षान्कांश्चित्क्षपयितुमना दक्षिणस्यां दिशायाम् ।
पारेऽम्भोधेर्महति जनयन्नन्दथुं श्रीकुमार्याः
क्षेत्रं प्रापत्कलिमलहरं विश्वमातुश्चिरत्नम् ॥ २ ॥

---

1 सुदेवो असि वरुण यस्य ते सप्तसिन्धव अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव।

पश्यन्नब्धिं सपदि मुमुदे शैलतुङ्गैस्तरङ्गै-
झाङ्कुर्वद्भिः परिसरगतांस्तर्जयन्तं महान्तम् ।
ग्रावस्तोमैः प्रतिहततया फेनिलं सन्निवृत्तौ
भीमावर्तं विदधदसकृद्बिभ्रतं वीचिजातम् ॥ ३ ॥

पृक्तस्निग्धं लवणजलधेश्शीकरैरूर्मिकीर्णैः
क्षुद्रस्याद्रेश्शिखरमखरस्पर्शमध्यास्य सायम् ।
आसीत्सोऽयं पवनमुदधेस्सेवमानो मरुत्व-
च्छैलारण्यौषधिरसभृताऽऽश्लिष्टमार्द्रानिलेन ॥ ४ ॥

दर्शं दर्शं धरणिदिविषन्निर्निमेषोऽर्णवं स
स्वैरं क्रीडन्मकरनिकरं भीकरं नक्रचक्रैः ।
गच्छद्भिश्च प्लवसमुदयैर्धीवराणाङ्कुमारै-
र्हृद्यं पाथोविहगविरुतैर्मोदवार्धौ न्यमज्जत् ॥ ५ ॥

अङ्घ्रिच्छायामचलदुहितुस्सर्वदाध्यास्य धैर्या-
दप्रत्यूहं प्रकृतिविहितं बिभ्रतं स्वाधिकारम् ।
हर्षोद्रेकादुदधिमवदत्सोऽपि सम्बोध्य शश्व-
च्छ्रेदं पश्येन्न रसिकजनश्चेतनाचेतनेषु ॥ ६ ॥

श्रीशानस्य श्वशुर ! बिभयामासिवांसं सुरेशा-
न्मैनाकाद्रिं निरुपमकृपस्त्वं प्रपन्नं ह्यरक्षः ।
बन्धं सेतोस्स्वयमसहथा रामकैङ्कर्यलोभा-
न्माहात्म्यं ते जगति गदितुं ढौकतां पाण्डितीं कः ॥ ७ ॥

कूले ज्योत्स्नाधवलपुलिनैर्मञ्जुले बालिशानां
स्तोमं शुक्त्याहरणविधये सम्भ्रमेण भ्रमन्तम् ।
रक्तश्वेतासितसिकतिलान्भूविभागाननेका-
न्त्रीह्याकारा अपि च मसृणा वालुकास्सन्ददर्श ॥ ८ ॥

शेतामेको हरिरविरतं दुग्धपाथोधिमध्ये
सङ्ख्यातीतानभिनवघनश्यामलाञ्श्रीसमेतान् ।
विष्णून्वीक्षध्वमिह सततं सञ्चरिष्णून्समन्ता-
दित्यूर्मीन्स्वाञ्शिखरिसदृशोऽदीदृशद्वारिराशिः ॥ ९ ॥

[1]नावासासीदनिलचलिता नीलकल्लोलमाला
प्रत्युद्गच्छन्त्यविरळबृहत्तालवृक्षावलीव ।
फेनोत्तंसा कलहमतुलङ्कर्तुकामेव गर्ज-
न्त्याबिभ्रत्या सितघनततिं मूर्ध्नि नीलाद्रिपङ्क्त्या ॥ १० ॥

---

1 अवपूर्वात्स्य तेर्लङ्

पातुं पाथः सरिदधिपतौ किन्न्ववप्लुत्य वेगा-
त्खेलन्त्युच्चैःक्वचितनभःप्रान्ततो वारिवाहाः ।
इत्यम्भोधिर्धियमचकलद्दूरमुद्वीक्ष्यमाणैः
फेनप्रायैः प्रगुणितरयैरूर्मिभिर्भूरिगौरैः ॥ ११ ॥

छायावृक्षैः क्वचितसुखेष्वण्डजानां निवासै-
र्व्याप्तैः कीर्णेष्वनुपमपयःपातचेतोहरेषु ।
शैलेन्द्राणां तटभुवि सदा कन्दरेषु प्रतिश्रु-
द्वाचामश्राव्युपगतवतामाढ्यसांयात्रिकाणाम् ॥ १२ ॥

राजन्त्युच्चैर्नरपतिगृहाश्चन्द्रशालाभिरामाः
पारेऽम्भोधेरमरनगराखर्वगर्वं हरन्तः ।
यत्र स्त्रीणां विजयिषु मुखेष्वेव वातायनस्थे-
ष्विन्दुर्लज्जालवविरहितो दीप्यते व्योम्नि रात्रौ ॥ १३ ॥

अत्युच्छ्रायं जलधिजठरे स्तम्भमम्भोमयं द्रा-
ग्झञ्झावातः कलयति भृशं दारुणः कालयोगात् ।
नावः क्रुद्धा बहुरयवशात्सञ्चरन्त्यो विवर्ते
मज्जन्त्याशु प्रगुणितभयैर्नाविकैर्दुर्निरोधाः ॥ १४ ॥

क्षेत्रे धर्मश्चरत जगतीमातुरत्यन्तमिष्टं
स्तोकं दत्त द्रविणमनघा ! भाग्यभाजो भवेत ।
इत्थं स्वार्थप्रवणधिषणो यात्रिकानर्थिसार्थो
व्यर्थाशीर्भिर्व्यथयति धनायार्दितोऽनुजिहानः ॥ १९ ॥

स्नातुं वार्धावुचितवसनाः प्रेक्षणीयास्तरुण्यः
सुभ्रूबृन्दैस्सरसविहृतौ लालसेनानिलेन ।
विस्पष्टाङ्गास्समजनिषताभीक्ष्णमक्ष्णान्तु यूनां
सायं सायं जयति मिळतामुत्सवो भाग्यभाजाम् ॥ १६ ॥

क्रीडत्सुभ्रूस्तनभरहता मन्दवेगास्तरङ्गाः
शीर्णाः श्रान्तास्तटमुपगताः फेनमप्युद्वमन्तः ।
शान्तारावाः सपदि सिकतास्वेव लीना अभूव-
न्नत्युच्छ्रायो निधनमवनौ कस्य वा नो विदध्यात् ॥ १७ ॥

स्वैरं नीलोर्म्युदरविहरत्केरळाराळकेश्यो
दूरीकुर्वन्त्यचिरजलदद्योतिविद्युच्छ्रियं द्राक् ।
ऐन्द्रं चापं बत ! विदधते चित्रवर्णं हरिद्रा-
चूर्णैर्नेत्राञ्जनशबळितैः कुङ्कुमैः क्षाल्यमानैः ॥ १८ ॥

आपः प्राप्ता घनलवणतामाशु शीर्णास्समन्ता-
द्वातस्पर्शाज्जलधिविलसद्ग्रण्डशैलोपरिष्टात् ।
तान्याहर्तुं शबरवनितास्सङ्गता वासरान्ते
स्तन्यं भूरिस्नुतमह ! शिशून्पाययन्त्यश्चरन्ति ॥ १९ ॥

वीचिक्षोभा वसनममलं मा सिचन्नित्यधीरा
उत्क्षिप्योर्ध्वं निजकरयुगेनोरुदघ्नं मृगाक्ष्यः ।
सोपानेषु न्यदधत शनैः पञ्चषेषु स्वपादा-
न्पारावारस्सरसहृदमूरार्द्रयामास सद्यः ॥ २० ॥

अब्ध्युद्भूतां मम सहचरीं भार्गवीं मावमंस्थाः
काले तस्मिन्मम नयनयोस्सा च हृद्या ललास ।
निस्सन्देहं त्वमिह विजयेथास्तथापि क्षमस्वे-
त्यङ्घ्र्योर्मूर्तो हरिरिव तटे सुभ्रुवोऽपतदूर्मिः ॥ २१ ॥

धून्वन्वासांस्युदधिपवनः कामिनीनां सहेलं
यूनां स्वान्तैर्युगपदधिकं यत्र नार्या व्यहार्षीत् ।
सभ्रूभङ्गं किमपि निगदन्त्यात्मना लज्जया सा
स्त्रैणे लीना कमपि तरुणं लोचनाभ्यामधासीत् ॥ २२ ॥

चन्द्रः काङ्क्षन्समयमुचितं त्वद्विमर्दैकलोलः
श्रृङ्गार्यैकः कुमुदमुकुळ ! त्वां सुजातं समेयात् ।
प्रोवाचेत्थं, कमपि तरुणी सस्मितं वीक्षमाणा
क्षौमं वक्षस्स्थलविलसितं स्रंसयन्ती कथञ्चित् ॥ २३ ॥

कैश्यं पिङ्गं कतिचन वहन्त्योऽपि सन्दर्शनीयाः
पुम्भिस्सार्धं सरसविहृतौ निस्त्रपा गौरवर्णाः ।
मार्जाराक्ष्यः स्थलकमलरुग्गण्डपालीमनोज्ञाः
सायं काम्यन्त्युदधिपवनं सेवितुं हूणनार्यः ॥ २४ ॥

क्षिप्ता रोधस्यभिनवरुचश्शुक्तिका वीचिपङ्क्त्या
पांसुच्छन्ना अपि चिरतरं, प्रापिताश्च प्रकाशम् ।
यत्नात्सारस्वतमपि समाहृत्य सद्वस्तुजातं
विक्रीणन्ति प्रतिदिनमधोजातयो जीविकायै ॥ २५ ॥

रत्नान्यन्तर्जठरमभितो वारिधिं बिभ्रतं त्वां
केचिद्गाढं स्वयमनिपुणा भूरिधैर्याद्विगाढुम् ।
निन्दन्त्यापो लवणमिळिताः पातुमर्हा न हीति
स्वासामर्थ्यं परगुणतृणीकारहेतुर्हि लोके ॥ २६ ॥

अन्तश्शान्तोऽस्यधिकमुदधे ! कर्मवीरोपकृत्यै
यन्मज्जन्ति त्वयि कतिपये प्रत्ययान्मौक्तिकार्थम् ।
बाह्याटोपस्तव समुचितो धीरलोकान्विवेक्तुं
प्रेक्षावन्तो ददति भुवने न ह्यकृत्वा परीक्षाम् ॥ २७ ॥

एह्येहीतश्चरति मकरः पश्य हन्त ! स्वकीया-
न्निक्षिप्यैतद्बडिशमधुना तूर्णमेनं गृहाण ।
इत्यन्योन्यं गदितुमभितो धावतां धीवराणा-
मेधामासुस्तटभुवि वचांस्यञ्जसोच्चावचानि ॥ २८ ॥

अब्धेरन्तस्सलिलमभितो निर्निरोधश्चरन्तः
केचिज्जात्याः क्षुधितमकरा दृङ्मयूखावलीस्स्वाः ।
विद्युद्वल्लीरिव समधिकं भासयन्तीः प्रसार्य
क्षुद्राञ्जक्षत्यहह ! जलचरानक्षिसात्कृत्य सद्यः ॥ २९ ॥

अम्भःकूलौषधिदळगतान्पक्षिणो वर्तिकादी-
ँल्लक्ष्यीकृत्याधिकतररयं वारिधारोक्षणेन ।
तूर्णं वारिष्वहह ! मकरास्सन्निपात्य ग्रसन्ते
स्वैरं केचित्सततमृगयालम्पटाः पर्यटन्तः ॥ ३० ॥

ओषध्योऽप्सु प्रसृतदळसंस्निग्धभावाः प्ररूढा
मांसाशिन्यो मधुकरमुखान्पत्रलग्नांश्च कीटान् ।
आच्छाद्य द्रागसुविरहितांस्तान्क्षणेन ग्रसित्वा
पूर्वावस्थां नयनसुभगां दर्शयन्त्येव भूयः ॥ ३१ ॥

वालाघातैरधिजलनिधि क्रोधना मज्जयन्तः
क्रूराकाराः प्रबलतिमयस्तूर्णमभ्यणनौकाः ।
उच्छ्वासार्थं प्लवनसमये तीक्ष्णकुन्तैस्समन्ता-
दापीड्यन्ते ग्रहणनिपुणैर्धीवरैरप्रमत्तैः ॥ ३२ ॥

यादांस्यद्भिस्सह निपतितान्यास्यगर्तेष्वयत्ना-
दुद्वम्यापः सपदि तितउप्रक्रियामावहन्तः ।
द्राघीयांसः कतिचन गजाकर्षणेऽपि प्रवीणा
जक्षत्यत्युद्भटगतियुता भीमकायास्तिमीन्द्राः ॥ ३३ ॥

पाथोवर्त्म प्रहतमसकृज्ज्ञातवन्तस्स्वनौकाः
पूर्णा नानाजनसमुदयैरायसीः कर्णधाराः ।
गूढोत्सभ्योऽप्स्वविरतमयःकान्तभूभृद्व्रजेभ्यः
कामं भीतास्स्वयमगमयन्सर्वथा जागरूकाः ॥ ३४ ॥

द्वीपभ्रान्त्या जरठकमठप्रेष्ठपृष्ठेऽवतीर्णाः
पान्थाः केचिज्जठरपिठरक्षुत्प्रशान्त्यै पचन्तः ।
चुल्ल्यग्न्यौष्ण्याच्चलितवपुषा पातितास्त्वय्युदन्वन् !
स्वामिन्यासज्जति हि विहितस्वाश्रितैर्हन्त! मन्तुः ॥ ३५॥

त्वामाश्रित्य प्रबलशफराः क्षुद्रमत्स्याश्च सर्वे
स्वैरं क्रीडन्त्यविरतमविज्ञातदुःखाः समन्तात् ।
नैवोत्साहस्स्थलतनुभृतामीदृशस्स्यान्महाब्धे !
सङ्क्रामन्त्याश्रयगतगुणा ह्याश्रितान्निर्विशेषम् ॥ ३६ ॥

नैल्यं व्योम्नस्स्वयमयमहो ! निर्मलापोऽप्युदन्वा-
नूरीकृत्य प्रतिवितरति श्रेयसे स्वामृतांशुम् ।
सत्यप्येवं त्यजति न वियत्स्वीयमालिन्यदोषं
रिक्तात्मानो न खलु भुवने सन्निवर्त्या महद्भिः ॥ ३७ ॥

स्निग्धाम्भोधे ! शृणु मम गिरं दूरमुत्सार्य गर्वं
पश्य व्योम त्वदपि विभवैः श्रेष्ठमत्यन्तशान्तम् ।
उच्चस्थानं जगति भजते मौनमालम्बमानो
व्यर्थालापैर्व्रजति सुमहानप्यधस्तादवस्थाम् ॥ ३८ ॥

अद्भिस्सिन्धुर्दिनकरकरैरुद्धृताभिस्समन्ता-
त्सिञ्चन्कृत्स्नामपि वसुमतीं क्षेममाधाय भूयः ।
गृह्णात्युज्जीवयितुमखिलानापगारूपिणीस्ता
दत्तादानं भवति महतामन्यनिश्श्रेयसाय ॥ ३९ ॥

कालेऽनादौ प्रवहति विपर्यासहेतौ समेषा-
मेकोऽम्भोधिः प्रकृतिवशगोऽप्यभ्रवन्निर्विकारः ।
निर्मर्यादञ्चरितुमपथे न व्यवस्यत्यपीशो
धीरो लोके न हि विकुरुते जातुचित्कारणेषु ॥ ४० ॥

संहृष्येयुस्सरसहृदयाश्शुष्कनीरस्समुद्रः
स्याच्चेद्दीप्रं प्रचुरतरमुद्वीक्ष्य सद्रत्नजातम् ।
मेर्वादिः किं जगति विलसेत्ख्यातिरुच्चैस्तदानी-
मौदासीन्यं दधति सुतरामन्यकीर्तौ महान्तः ॥ ४१ ॥

शब्दैरब्धे ! किमपि किमपि श्राम्यसीव प्रवक्तुं
कस्तेऽनर्घं हृदयपिहितं वेद भावं रसार्द्रम् ।
लोकः कामं वदतु जडधिं त्वां, ततो मा व्यथिष्ठाः
शाठ्यादारोपयति हि जनस्स्वात्मदोषं परत्र ॥ ४२ ॥

गृह्णन्नणस्सदयहृदयाद्वारिवाहस्त्वदब्धे !
वर्षत्युच्चैर्जलद इति च ख्यातिमाप्नोति पृथ्व्याम् ।
दत्ते साक्षाद्य इह भुवने स्तौति लोकस्तमेव
द्रव्यस्वामी त्वहह ! लभते नैव चित्तेऽवकाशम् ॥ ४३ ॥

नेत्रानन्दं मनसि कलयन्नात्मरत्नाकरत्वं
पारावार ! त्वमिह भुवनेऽदर्शयिष्यस्समेषाम् ।
लोकोऽनङ्क्ष्यत्सपदि तरसान्योन्यघातं विनिघ्न-
न्साधूनामप्यहह ! कृपणानर्थहेतुः प्रवृत्तिः ॥ ४४ ॥

त्वत्सञ्जातं सकलजगदुन्मूलने मूलभूतं
त्र्यक्षः कश्चिद्विषमपि पिबन्धर्मराजं जिगाय ।
सत्येवं ते मधुरममृतं शश्वदास्वाद्य देवाः
प्रापुर्नैर्जर्यमिति नतरामद्भुतं नः पयोधे ! ॥ ४५ ॥

खर्वः पूर्वं सलिलमखिलं ह्याचचाम प्रभावा-
दौर्वोऽद्यापि स्थगयतितरां सन्ततं ते प्रवृद्धिम् ।
नोचेल्लोकं खलु कवलयेस्सर्वमप्याशु दर्पा-
न्न क्षन्तव्यो भवति महतामप्यनल्पोऽवलेपः ॥ ४६ ॥

क्षेमङ्कर्तुं सकलजगतां बद्धदीक्षस्सरस्वन्!
प्रीत्या सर्वस्वमपि दिशसि त्वं महात्मैव सत्यम् ॥
सत्यप्येवं तव पुनरिमामार्भटीं नाद्रियेऽहं
त्यागः कीर्तिं हरति महता डम्बरेण प्रयुक्तः ॥ ४७ ॥

अप्राधान्यं नियतिवशतः प्रापितास्स्वाभिधेयै-
श्शब्दास्सर्वे व्यवहृतिजुषोऽप्यर्थतादात्म्यभाजः ।
प्राधान्यं ते पुनरुपगताः पाणिनिप्रोक्तशास्त्रे
निर्वर्णा अप्युपरिगणिता न्यक्कृतार्थास्त्वयाब्धे ! ॥ ४८ ॥

नानादिग्भ्यस्स्वयमुपगता माननीया मनोज्ञा
उच्चैर्भूभृत्प्रवरदुहितॄरर्णव ! त्वां वृणानाः ।
शब्दैरेतैः श्रुतिकटुतरैर्मूढ ! मा भीषयस्व
स्त्रीणां भीरूण्यबलहृदयान्यन्तरेणैव हेतुम् ॥ ४९ ॥

संस्कार्याम्भस्तव जलधरैस्स्वादयोग्यं दधत्यः
पुष्णत्यः क्ष्मां द्रुमनिबिडितां जीवराशीनवन्त्यः ।
पूता देवायतनशतसंसेवनान्निर्झरिण्यः
त्वामाश्लिष्यन्त्यमितसुकृतैर्वर्धसे धर्मदारैः ॥ ५० ॥

सिन्धुर्गङ्गा तपनतनया हृद्यगोदावरी च
श्रीकावेरी निरुपमरसा शर्मदा नर्मदापि ।
[1]अन्तर्वाहिन्यपि च पतितान्पावयन्त्यस्तटिन्यः
प्रेयांस त्वां परमरसिकं कामयन्ते महान्तम् ॥ ५१ ॥

यत्नागाधस्त्वमसि जलधे ! तत्र वातस्तरङ्गा-
नुत्थाप्य त्वां प्रकृतिचलितं नैव शक्नोति कर्तुम् ।
तत्राधत्ते विकृतिममितां, यत्र नैवंविधस्त्वं
दुश्चेष्टानामणुरपि कदाप्यप्रदेयोऽवकाशः ॥ ५२ ॥

सौन्दर्याणां जगति लसतां देवतां मूलभूतां
पद्मामब्धे ! ददिथ तनयां स्वस्य पुंसे परस्मै ।
अत्यन्ताय ह्यजनि युवयोश्श्लाध्य एषोऽनुबन्धः
सद्भिस्सङ्गो भवति हि सतां सर्वसम्प्रीणनाय ॥ ५३ ॥

लब्धुं वार्धेऽहमहमिकया सम्प्रहृत्यात्रजङ्घ्य-
स्तुष्यन्त्वेते सुमनस इति श्रीमुखांस्त्वं वितीर्य ।
पर्यैक्षिष्ठा अपि पशुपतिं कालकूटप्रदाना-
त्स्थाने, शक्तिं जगति महतां ज्ञातुमन्ये ह्यशक्ताः ॥ ५४ ॥

---

1. अन्तर्वाहिनी=सरस्वती

किं त्वं क्ष्मायां प्रवहसि बहुं भागमाक्रम्य किं वा
त्वय्युर्वीयं प्लवत इति मे संशयं वारिराशे ।
मित्रस्याद्य व्यपनय, परं प्रष्टुमिच्छामि नैवं
प्राज्ञम्मन्याकुलितभुवने ज्ञानवान्दुर्लभो नु ॥ ५९ ॥

अप्येकस्या जगति जलधे ! क्षुद्रशुक्त्यास्स्वरूपं
ज्ञातुं शक्तो भवति नतरां हन्त ! वैज्ञानिको यः ।
द्वित्रैश्शब्दैः किमपि कथयन्स प्रसिद्ध्यत्यनर्थै-
र्वक्तुः कीर्त्यै क्वचन समये कल्पतेऽर्थाग्रहोऽपि ॥ ५६ ॥

उड्डीयोच्चैर्विदधति जलाभ्यन्तरोत्थाश्शकुन्ताः
श्रेणीबन्धं नयनसुभगं त्यक्तदुःखानुबन्धाः ।
स्नेहित्वान्योन्यमुदितकथाः पञ्चषांस्ते निमेषा-
न्सम्भूयाम्भस्यमितकुतुकास्सन्निमज्जन्ति भूयः ॥ ५७ ॥

विद्युत्वन्तस्त्वयि च नितरां हन्त ! वर्षन्त्युदग्रा-
स्तप्तेऽत्यन्तं जगति दिनकृद्दृष्टिपातात्समन्तात् ।
रुन्त्स्व स्वैरं त्वमिदमुदधे ! पक्षपातप्रयुक्तं
दत्वाऽऽदानं पुनरपि ततो नैव कल्पेत भूत्यै ॥ ५८ ॥

[1]द्वीपान्युद्धान्त्यमितविभवैः श्रेष्ठवस्वोकसारा-
स्पर्धीन्यद्रिद्रुमवनसरित्स्तोमचेतोहराणि ।
ऋक्षाणीवाम्बरतलमलङ्कुर्वते सर्वथा त्वां
प्रत्नो रत्नाकर ! हि महिमा मानहीनस्तवायम् ॥ ५९ ॥

व्योम श्यामं सजलजलदश्यामळः पद्मनाभ-
स्त्वञ्च श्यामः कुवलयदळश्यामळा शैलकन्या ।
स्थेम्ने भूमेरधिकृतवतां किन्न्वधीकारचिह्नं
किं वा नैल्यं परममहिमव्यञ्जकं रञ्जकं वः ॥ ६० ॥

चेतश्शान्तिं मम वितरतात्संप्रसन्नः प्रचेताः
वर्धस्वाब्धे ! त्वमपि मुदितश्चन्द्रसन्दर्शनेन ।
कुर्वन्सन्ध्याप्रणतिमुपयाम्यालयं श्रीकुमार्याः
सर्वस्वं स्तादुपरि सततं स्निग्ध ! सारस्वतं मे ॥ ६१ ॥

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
सारस्वतसर्वस्वन्नाम प्रथमो विलासः ।

---

1. उद्धान्तीति शतन्तम्

# प्रकृतिविलासकाव्ये

## काननकामनीयकं नाम

## द्वितीयो विलासः

---

कल्याणमाकलयतात्कुलशैलकन्या
    धम्मिल्लफुल्लतरमल्लिमिळन्मिळिन्दा ।
प्रत्यग्रवारिधरसोदरविग्रहश्री-
    रश्रान्तनर्तनपरा विपिनान्तदुर्गा ॥ १ ॥

अस्ति ह्यनन्तपुरमप्रतिमैस्स्वसम्प-
    त्स्तोमैर्विलुम्पितनिलिम्पपुरावलेपम् ।
नीलाद्रिपङ्क्तिरिव भोगिनि यस्य मूर्तिः
    स श्रीपतिर्यदधितिष्ठति पद्मनाभः ॥ २ ॥

दृग्भ्यान्निपीय भगवन्तमनन्ततल्पं
    निध्याय तं स्तवमयैः कुसुमैस्समर्च्य ।
विप्रोत्तमस्स मतिमान्नगरे विरज्य-
    न्दृष्ट्वाभिनन्दितुमियेषतमां वनानि ॥ ३ ॥

आरण्यका नहि कदाप्ययथार्थमाहुः
प्राणात्ययेऽपि न जहत्युपकारचिन्ताम् ।
पौरास्तु जिह्मतयः प्रचरन्त्यमार्गे
पुण्यात्मनां हि भवनं वनमित्यमंस्त ॥ ४ ॥

उत्थाय पङ्कजकुलस्य विकासतः प्रा-
ङ्निर्वर्त्य कृत्यमखिलं द्रुतमात्मनीनम् ।
धीरः पुरात्स निरगादलकाभिरामा-
त्सौभाग्यमीक्षितुमना विपिनान्तलक्ष्म्याः ॥ ५ ॥

उच्चावचाचलसमाकुलदिङ्मुखानि
छायाद्रुमैरविरलैर्निचुलीकृतानि ।
स श्यामशाद्वलसरोवरमेदुराणि
कीर्णान्यवाप हरिणैश्च वनस्थलानि ॥ ६ ॥

नीडोदरेषु विहगा व्यरुवन्मनोज्ञं
म्लानप्रभामबिभरुस्सुरतप्रदीपाः ।
सम्प्रावदन्धुतमुखाः कृकवाकुसङ्घा
रोचींष्यनुष्णकिरणं दिवि नाप्यपुष्णन् ॥ ७ ॥

उन्मीलनोन्मुखसरोजविराजिताया-
मुन्निद्रहंसमिथुनैरुपशोभितायाम् ।
जप्त्वाघमर्षणमृषिप्रवरा झरिण्यां
सस्नुर्दिवस्पतिदिशं गतवत्यनूरौ ॥ ८ ॥

लीढ्वाङ्कानि निजजिह्विकयातिमृद्व्या
स्तन्यं स्नुतं हरिणयोषिति पाययन्त्याम् ।
अर्धप्रबुद्धमृगशावकवक्त्रतस्त-
त्क्षित्यामपसदतिफेनिलमीषदुष्णम् ॥ ९ ॥

अत्यन्तसंस्तुतमिलिन्दपुरन्ध्रिवाचं
श्रुत्वापि हन्त ! नळिनीमनपेतदुःखाम् ।
आश्वासयन्निव निवेद्य सहस्ररश्मे-
रभ्यागमं स्वयमदीपितरामनूरुः ॥ १० ॥

पुत्रा इवावनिभृतां रतिमन्दिरेभ्यः
पुष्पन्धयाः कतिपये कुमुदोदरेभ्यः ।
प्रस्थातुमप्युदसहन्त न [1]शीतकत्वा-
ल्लक्ष्म्यां सरोरुहविहाररसोत्सुकायाम् ॥ ११ ॥

---

1. शीतकः = अलसः

पीयूषकल्पमकरन्दमिळद्रजांसि
    नीहारसीकरकरम्बितकेसराणि ।
प्रत्यूषशीतपवनेरितपादपेभ्यः
पुष्पाणि वृन्तगळितान्यपतंस्तटिन्याम् ॥ १२ ॥

हित्वा सुषुप्तिमतिमात्ररतिश्रमोत्थां
    पक्षान्स्वचञ्चुभिरदन्तुरमालिखन्त्यः ।
नीडोदरेषु शयितान्कमितॄनपत्यैः
    प्राबोधयन्नुषसि मन्दरुतैः कपोत्यः ॥ १३ ॥

बध्वाञ्जलिङ्कमलकोशमिषेण मूकै-
    र्वाचंयमत्वमळिभिस्स्वयमावहन्ती ।
अम्भःकणाश्रुवदना दयितं तपस्वि-
    न्यालोकितुं समुदकण्ठत पद्मिनी द्राक् ॥ १४ ॥

त्वत्कान्तिलेशमुपजीव्य निशि भ्रमद्भि-
    श्चन्द्रादिभिर्दिगुपभुक्तचरी मघोनः ।
पूतात्मनः किमुचिता विहृतिस्तयेति
    प्रोद्यन्तमर्यमणमम्बुजिनी जहास ॥ १५ ॥

संरक्ष्य नक्तमधिकैरवगर्भमिन्दु-
स्संवेशितां श्रियमनिद्रसहस्रपत्रे ।
प्रत्यर्पयन् सवितृमण्डलमध्यवर्ति-
पुंसे क्रमेण कृतकृत्यतया तिरोऽभूत् ॥ १६ ॥

गीतिं मुदा मधुकरीषु वितन्वतीषु
हंसीषु पक्षपुटताडनतोऽप्सु तालान् ।
तीरद्रुमेषु विकिरत्सु सुमान्यभीक्ष्णं
लक्ष्मीर्ननर्त सरसीरुहरङ्गधाम्नि ॥ १७ ॥

श्यामायितेऽपरिमितैस्तरुभिर्वनान्ते
निश्शेषमेष विनिहन्तुमिनप्रकाशः ।
नैवाशकत्सततसन्तमसाधिकारं
मूर्खस्य चेतसि विमोहमिवोपदेशः ॥ १८ ॥

अभ्रङ्कषाद्रिजमहौषधिसारमिश्राः
स्रोतस्विनीरमृतसोदरवारिपूराः ।
आवर्तचक्रपरिवर्तितपाटलौघा
दृष्ट्वा जहर्ष सुतरां धरणीसुरेन्द्रः ॥ १९ ॥

जम्बूफलानि गलितानि पचेलिमत्वा-
दातन्वताच्छसलिलान्यरुणच्छवीनि ।
शैलेन्द्रकन्दरपथात्सरयं वहन्त्या
धुन्या निमज्जदिभराजविराजितायाः ॥ २० ॥

प्रक्रान्तचाटुवचनाः प्रणदद्द्विरेफैः
पुष्पोद्गमैश्च रुचिरैः कृतमन्दहासाः ।
रक्तैर्भृशङ्किसलयैरनुरागपूर्णाः
पर्यष्वजन्त लतिकास्सहकारवृक्षान् ॥ २१ ॥

मित्रस्य च क्रमिकमभ्युदयं समीक्ष्य
सेर्ष्याणि काननतमांसि वनं विहाय ।
सम्भूय शैलविवरोदरभाञ्ज्यभूवं-
स्तप्तुं तपः किमु तदस्तमयाय तूर्णम् ॥ २२ ॥

स्वादून्यरण्यसुलभानि फलानि जग्ध्वा
पीत्वा पयः प्रसृमरं सरसं सरस्याः ।
मध्येऽह्नि भूमिदिविषत्पिकसारिकाद्य-
मध्यास्य कुञ्जभवनं पवनं सिषेवे ॥ २३ ॥

उद्दण्डचण्डकरमण्डलमण्डजोऽपि
दृष्ट्वा न हिण्डितुमियेष बहिर्द्रुषण्डात् ।
कण्डूलगण्डतलताण्डवलोलभृङ्गं
वेतण्डराड् भ्रमति कश्चिदुदस्य शुण्डाम् ॥ २४ ॥

आखेटकाय निशि निष्कुटिताटवीकं
जग्ध्वातिगृध्नु पिशितं वहु कण्ठदघ्नम् ।
शार्दूलमण्डलमढौकत गाढनिद्रां
प्रच्छायपादपमहीभृदुपत्यकायाम् ॥ २५ ॥

शूलाकृत प्रसृमरारुणशोणितानि
प्रत्यग्रशल्यपललानि पलालवह्नौ ।
न्यग्रोधमूलभुवि कौटिलिकः किरात-
व्रातो ज्वले निजगभस्तिभिरभ्ररत्ने ॥ २६ ॥

माद्यन्द्विपः कमलिनीं निजकर्णजाहे
कर्णेजपैर्मधुकरैरिव बोध्यमानः ।
निर्मथ्य गाहितुमसोढतरार्कतापो
धावत्यनोकहवरान्पथि पातयित्वा ॥ २७ ॥

स्वापात्परत्र निभृतत्वमतिद्विषन्त-
　　श्शाखामृगा अपि निगृह्य मतिं श्रमेण ।
नोषंबभूवुरह ! संयमिसंस्तवेन
　　शोकापनोदपदवीमिव लब्धुकामाः ॥ २८ ॥

शाखावलम्बिवपुषश्च वलीमुखानां
　　डोलायिताः कतिपयेऽजगरा द्रुमेषु ।
वीरुद्भ्रमाद् द्विरदवृन्दकरैर्विकृष्य
　　दूरेतरां सपदि चिक्षिपिरे जवेन ॥ २९ ॥

सद्योनिगीर्णमदवारणदन्तुराणि
　　पीनोदराण्यजगराश्शयिता दधानाः ।
स्वेदद्रवान्निजशरीरभवानपीप्य-
　　न्नभ्यर्णगामि कृकलासकुलं तृषार्तम् ॥ ३० ॥

द्वारेषु मृत्युनगरस्य विदारितेषु
　　वक्त्रेष्वयत्नपतितान्विपिनद्विपानाम् ।
स्तोमान्यथेच्छमह ! जग्रसिरे क्षुधार्ता
　　भाग्योदयादजगराश्चलशैलकल्पाः ॥ ३१ ॥

यत्नेन कन्दफलमूलसमित्कुशादी-
न्याहृत्य नैजमुटजव्रजमाव्रजन्तः ।
उद्यम्य दण्डनिवहान्परिभर्त्स्य रिक्त-
हस्तीकृता मुनिसुताः पथि वानरेन्द्रैः ॥ ३२ ॥

स्वैरं प्रसार्य फणिनः स्वफणाश्चरन्तो
गारुत्मतेन विरुतेन निकुञ्चिताङ्गाः ।
त्रासान्नितान्तमतिदुर्गमवेणुमूल-
वल्मीकसंहतिषु सन्न्यविशन्त सद्यः ॥ ३३ ॥

यावत्सरोवरमवातरदत्यगाधं
तावद्व्यकृष्यत बलाद् वनवारणेन्द्रः ।
ग्राहेण भीमवपुषातितरस्विनान्ते
कृच्छ्रादमुच्यत सुहृत्तरहस्तिसार्थैः ॥ ३४ ॥

तीक्ष्णैरयःखरतरैर्महिषा विषाणै-
र्वन्या निपानसलिलानि विलोडयन्तः ।
दुर्दर्शवक्त्रकुहरानुपकण्ठभाजो
नाजीगणन्बत ! मनागपि पुण्डरीकान् ॥ ३५ ॥

रोमन्थमभ्यसितुमारभतोपविष्टं
 प्रच्छायपादपतले सुखमेणबृन्दम् ।
तेनारमन्त परिमृज्य तदङ्गकानि
 स्वैरङ्कुमारनिकराश्च तपोधनानाम् ॥ ३६ ॥

लीना मराळमहिळाः कमलोदरेषु
 शैलेन्द्रकन्दरगृहेषु मयूरनार्यः ।
एणाङ्गनाश्च मुनिपर्णगृहाङ्गणेषु
 पुष्पेषु भृङ्गललनाश्च निदाघतप्ताः ॥ ३७ ॥

नोदेति नास्तमयते परमार्थतो यो
 लोकान्सृजत्यवति संहरति प्रभावात् ।
द्रष्टा च यः सुकृतदुष्कृतयोस्समेषां
 मित्रः क्रमेण भगवानजहात्स्वतापम् ॥ ३८ ॥

तस्मिन्क्षणे द्युमणिरैन्ध भृशं प्रतीच्या
 संरक्तया कनककेतकदाम दत्तम् ।
धृत्वेव काननमनोकहसङ्कुलं त-
 त्तन्वन्पिशङ्गमभितः प्रकरैः कराणाम् ॥ ३९ ॥

नीडोदरेषु तिमिरं निशि मा प्रसाङ्क्षी-
दित्याकलय्य निजचञ्चुपुटैश्शकुन्ताः ।
कृत्वा च्छदैर्विरहितात्रजनीमुखान्ते
खद्योतकीटनिवहान्बत! निक्षिपन्ति ॥ ४० ॥

पाटीरमेदुरमहाद्रिपयोधराढ्यां
ज्योत्स्नांशुकां गिरिसरिद्रशनासनाथाम् ।
पुष्पोद्गमेन सुभगां विपिनान्तलक्ष्मी-
माश्लिक्षदिन्दुरमृतप्रकिरैः करैः स्वैः ॥ ४१ ॥

कुञ्जेषु गुञ्जदळिभिः परिरञ्जितेषु
पुष्पोद्गतैः परिमळैर्निचुळीकृतेषु ।
सम्फुल्लमल्लिपरिकल्पिततल्पकेषु
भिल्लाः पुरन्ध्रिभिरकुर्वत मारकेळिम् ॥ ४२ ॥

मन्दानिलाकुलितवल्लिनिकुञ्जपुञ्ज-
गुञ्जन्मनोज्ञमधुपव्रजमञ्जुलेयम् ।
एणार्भकैस्तत इतः कुतुकाद्व्रजद्भिः
कं रञ्जयेत्सहृदयं न वनोदरश्रीः ॥ ४३ ॥

स्वैरङ्करैः परिममर्श कृशोदरीणा-
मिन्दुर्घनानि जघनानि लतागृहेषु ।
पर्णान्तरेण सदनोदरमाविशद्भिः
पुष्पेषुकेलिकलनैकविलोलुपानाम् ॥ ४४ ॥

कस्याञ्चिदङ्कनिहितां मणिवल्लकीं स्व-
कण्ठस्वरानुसरणं परिवादयन्त्याम् ।
एणास्तृणेषु विमुखा निभृतोर्ध्वकर्ण-
माकर्णयन् शशिकरैर्विशदे निकुञ्जे ॥ ४५ ॥

धुन्वत्यधिज्यमधिकं धनुरिक्षुधन्व-
न्याधून्वति त्रिविधगन्धवहे च लोध्रान् ।
धैर्यं विधौ धुवति धामभिरद्रिरन्ध्रे
धन्या वधूर्निधुवने धियमाबबन्ध ॥ ४६ ॥

वल्गत्पयोधरमनोहरहीरहारा
व्याकीर्णमूर्धजगरिच्युतपारिजाता ।
शश्वत्क्वणत्कनककिङ्किणिकाञ्चि काचि-
त्कुञ्जेऽन्वभून्मदनकेलिसुखं वराङ्गी ॥ ४७ ॥

वामभ्रुवश्चिबुकमग्रकरेण हारि
प्रेम्णोन्नमय्य रमणेऽनुनयत्यभीक्ष्णम् ।
कस्याश्चिदक्षिकमलप्रभवोऽपि राग-
श्चेतोम्बुजन्म समशिश्रियत क्रमेण ॥ ४८ ॥

कश्चित्प्रतप्ततपनीयसगोत्रगात्रां
वामेक्षणां मसृणवर्तुलपीवरोरुम् ।
आश्लिक्षदध्युपवनं वनकैरविण्यां
संस्पर्धमान इव वीक्ष्य विधुं प्रसक्तम् ॥ ४९ ॥

मानेन सार्धमुपगच्छति तत्र नीव्या
बन्धे क्रमाच्छिथिलतां कमितुः पुरस्तात् ।
कस्याश्चिदिन्दुरसितोत्पलयुग्ममेष
नेष्टे समुद्धटयितुं स करैर्निकुञ्जे ॥ ५० ॥

नारैः किरातवनितास्सह रन्तुकामाः
श्रोणीभरेण च शनैः क्रमणेऽपि खिन्नाः ।
एकान्तमन्दिरधियाद्रिदरीर्विशन्ती-
र्व्यद्रावयन्नदयमृक्षयुगानि नक्तम् ॥ ५१ ॥

कान्तारपद्धतिषु कृत्रिमगर्तसत्व-
शङ्काकलङ्कितधियः करिणः प्रवृद्धाः ।
स्थाणून्मुहुः करधृतान्भुवि निक्षिपन्तो
रात्रौ चरन्ति कलभैरनुगम्यमानाः ॥ ५२ ॥

पाटीरकोटरविनिर्गतभोगिरत्न-
ज्वालावलीकवलितासु वनस्थलीषु ।
निश्चक्रमुर्न चकिता दिवसभ्रमेण
मूकाश्च घूकनिकराः क्षुधिताः क्षपायाम् ॥ ५३ ॥

यावत्क्षुधा गजरिपुस्समगर्जदुच्चै-
र्भूमौ निवेश्य वदनं समुदग्रदंष्ट्रम् ।
तावद्भिया कतिपये हरिणा विशीर्णाः
पञ्चास्यपार्श्वमुपगम्य झटित्यनश्यन् ॥ ५४ ॥

ग्राव्णाश्च दुर्गभुवि संविशतां हरीणां
सावर्ण्यतो बत ! भिदाग्रहमन्तरेण ।
सुस्निग्धवर्ष्म परितश्चरदेणवृन्दं
दुष्टात्मनां कबलतामचिरादयासीत् ॥ ५५ ॥

BVBSSMV



स्वस्यैव चेष्टितवशात्पिहितात्मवक्त्रः
स्निग्धीकृतैर्व्रततिपर्णचयैर्भृशान्धः ।
व्याघ्रो रुदंश्च परितः कलभाधिरुढैः
कुन्तैरघानि मृगयारसिकैः किरातैः ॥ ५६ ॥

पुच्छेन भूमिमभिहत्य रुषा, विदार्य
वक्त्रं, प्रभातरळमक्षियुगं प्रसार्य ।
द्वीपी निपत्य बत ! मृत्युरिव क्षणेन
कण्ठेऽग्रहीद्धरिणकं क्षुधितो निशीथे ॥ ५७ ॥

वृत्यावृतव्रजनिरुद्धमजार्भकाणां
स्तोमं प्रविश्य निभृतं विदिताभ्युपायः ।
रात्रावचूचुरदरण्यनिवासिनोऽपि
संवञ्च्य बुद्धिविभवेन श्रृगालवर्गः ॥ ५८ ॥

उत्प्लुत्य शश्वदभितो मसृणाङ्ककाना-
माक्रीडतां समुदयश्शशशावकानाम् ।
श्रुत्वा वृकौघविरुतं नितरां भयार्त-
स्तूर्णं व्यलीयत लतासदनोदरेषु ॥ ५९ ॥

787

अप्सु प्रतप्तरजतद्रवसन्निभासु
संफुल्लनीलजलजावलिकोमलासु ।
मन्दानिलाकुलतरङ्गपरम्परासु
वाप्या व्यहार्षुरसकृद्रमणैः करिण्यः ॥ ६० ॥

विद्वन्मनोहरतरं ललिताभिधानं
सद्वृत्तरत्नमचिरन्तनभावगर्भम् ।
आचन्द्रतारकमरण्यविहारिदुर्गे !
स्तात्कामनीयकमिदं भुवि काननस्य ॥ ६१ ॥

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
काननकामनीयकन्नाम द्वितीयो विलासः ।

# प्रकृतिविलासकाव्ये

## पर्वतपारम्यं नाम

## तृतीयो विलासः ॥

---

श्रियं देयादुर्वीधरशिखरमाश्रित्य रुचिरं
समिद्धः श्रीलक्ष्म्याः [1]पतिरुपनिषद्वेद्यचरणः ।
अभिद्रुह्यद्देवान्दनुजकुलमुन्मूल्य सकलं
जगत्क्षेमङ्कामं विदधदवतीर्य क्षितितलम् ॥ १ ॥

कथङ्कारं पारम्यमहमभिदध्यां शिखरिणां
प्रकृत्यैव स्थैर्यं जगति भजतामुन्नतिमपि ।
क्षमां बिभ्राणानां सुभगतरभावैर्विलसतां
महासत्वानां संस्तुतयमिशतानाञ्च महताम् ॥ २ ॥

महेन्द्राख्यं क्ष्माभृत्प्रवरमयमुर्वीसुरवरः
समारुह्य द्रष्टुं धियमधिकमानोज्ञकमधात् ।
प्रकृत्याः श्रीमातुस्सुकृतिसुलभं नृत्यमतुलं
पिबन्दृग्भ्यां लीनो भवति सुखवार्धौ सहृदयः ॥ ३ ॥

---

1. लक्ष्म्याः पतिः = श्रीवेंकटेशः

क वा वारांराशिः प्रकृतिमुखरो दुःश्रवरवैः
क वारण्यं गुण्येतरमृगगणाकीर्णमनिशम् ।
समुच्छ्रायं प्राप्ताः क जगति कुलक्ष्माभृदधिपाः
क्षितेर्मातुर्मूर्ता इव च महिमानो विजयिनः ॥ ४ ॥

स्थितः क्वाप्यंश्चामीकरशिखरिसम्राड् वसुमतीं
तुषाराद्रिर्गौरीगुरुरतुलरत्नैकनिलयः ।
अवन्ध्यश्रीर्विन्ध्योऽविरळतरकान्तारबहुळो
महेन्द्राद्रिस्सह्यो मलयगिरिरेते बहुमताः ॥ ५ ॥

गिरिं दर्शंदर्शं भुवनमपि विस्मृत्य सपदि
द्विजस्सम्बोध्यैवं किमपि किमपि स्वैरमवदत् ।
निवेशश्शैलानां सकलमह ! वाचालयितुम-
प्यलं नेत्रानन्दाकलनकुशलोऽयं सहृदयम् ॥ ६ ॥

छदौ चिच्छेदाद्रिप्रवर ! तव वज्रेण मघवा
तदत्यन्तं युक्तं ह्यजनि विधिसङ्कल्पवशतः ।
न चेदेवं दिव्याभरणमतुलं भारतभुवो
जगन्मातुर्देव्याः कथमिव भवेश्चिन्तय मनाक् ॥ ७ ॥

निवेशस्ते रम्यः प्रतिजनपदं विन्दति महा-
नरण्यैर्व्याप्तोऽयं विविधमभिधानं श्रुतिसुखम् ।
भवत्प्रान्तग्रामानधरतरवृन्दारकपुरान्
सुखादध्यासीना जगति खलु मर्त्याः सुकृतिनः ॥ ८ ॥

हिमाद्रिर्मूर्धानं परमकमनीयोऽनुवसति
त्वमप्येकं पार्श्वं क्षितिभृदुदयाख्योऽपरमपि ।
अलङ्कुर्वाथे द्वावुदरमपि विन्ध्यस्स भजते
गरीयस्यास्स्वर्गादपि शतगुणं भारतभुवः ॥ ९ ॥

प्रकृत्या देदीप्रं तव मघवनीलोपलचितं
विचित्रैर्धातूनामवनिधर ! वर्णैश्शबळितम् ।
वपुर्ज्योतिष्मच्छ्रीसमुदयविलासैकसदनं
हरत्यक्ष्णोश्शक्तिं तरणिकिरणौघप्रगुणितम् ॥ १० ॥

द्रुमास्सर्वे नम्राः परिणतफलैस्ते निबिडिता
लतास्सर्वाः पुष्पैर्मिळदळिकदम्बैर्निचुळिताः ।
वनान्ताः पाटीरद्रुमपरिमळैस्ते कवलिताः
प्रतीका द्रष्टॄणामचल ! तव नॄणां पुलकिताः ॥ ११ ॥

असामान्यं शैलाधिप ! वसुमतीत्वं प्रकटय-
स्यनन्तायास्तुङ्गावयवपदमाश्रित्य विशदम् ।
जगज्जीवातूनां शरणमसि मुख्यं जलमुचां
क्षितेरुद्भूता त्वं परमरमणीया परिणतिः ॥ १२ ॥

सरिच्छ्रेण्यः कामं पतनकमनीया नयनयो-
र्दरीभ्यस्स्यन्दिन्यो रुचिरवरहीरस्रगुपमाः ।
भुवो देव्याः पीनस्तनभरधुरां भूरि दधतः
परिष्कुर्वन्त्यद्रीन्सरसतरपाटीरसुरभीन् ॥ १३ ॥

वसानेव स्निग्धं हरितरुचि वासो विलससि
प्ररूढैस्त्वय्यल्पेतरविटपिवीरुत्समुदयैः ।
प्रसूनैरुत्फुल्लैर्हृदयहरवर्णैरिव मणि-
प्रभेदैराकल्पं कलयसि च माले ! शिखरिणाम् ॥ १४ ॥

समुत्तुङ्गे शृङ्गे समुपचितकार्पासरुचयः
चरन्तः स्वच्छन्दं विपरिणतिमाप्त्वा बहुविधाम् ।
तवोष्णीषायन्ते ह्यचल ! करिचर्माम्बरशिर-
स्सरित्स्रोतस्स्तोमान्भृशमुपहसन्तस्सितघनाः ॥ १५ ॥

परिष्कुर्वत्यब्धेस्तटभुवमुदग्रोर्मिमुखरा-
मरण्यानी कामं तव चरणसेवाप्रणयिनी ।
स्फुरत्सत्वोद्रेकं हरिहयमनोह्लादनपरं
वृणीते त्वां विश्वम्भरमिव हि लक्ष्मीरनिरतम् ॥ १६ ॥

अनुद्भूतात्मानः प्रथममथ गण्डोपलपथ-
क्षरद्धाराकारास्तदनु तनुकुल्याकृतिजुषः ।
विनिष्क्रामन्त्योऽद्रेर्विवरनिकरात्पातमुखराः
क्रमात्संवर्ध्य क्ष्मां जलधिमुपगच्छन्ति सरितः ॥ १७ ॥

भुवं कृत्स्नां पुष्णन्दुहितृभिरसङ्ख्याभिरनिशं
समर्प्यैताः पत्ये महितविभवायाम्बुनिधये ।
प्रशान्तात्मा विश्राम्यसि तटमधिष्ठाय जलधे-
र्महान्तस्ताटस्थ्यं न हि जहति निर्वर्त्य भविकम् ॥ १८ ॥

न वेदायं स्वीयाभ्युदयचयमूलं सलिलधि-
र्यदार्ये नेदिष्ठं न गणयति रात्रिन्दिवमपि ।
अमर्यादं शब्दायत इति जहीहि क्रुधमिमां
क्षमाहीनो नैव श्वशुरपदमध्यासितुमलम् ॥ १९ ॥

समुद्रः प्रत्यग्रैर्मुदिरनिकरैर्वर्धयति ते
गभीरं कान्तारं द्विरदमुखहिंस्रैः परिवृतम् ।
दरीद्वारस्फारारवमुखरवारां गिरिसरि-
द्वराणां वाराशिं त्वमपि निवहैः स्फावयसि तम् ॥ २० ॥

प्ररूढास्त्वय्यद्रे ! फलभरविनम्रा द्रुमवराः
परिष्वक्ताः पुष्यद्व्रततिभिरुदश्चत्कलरवाः ।
हरन्तः श्रान्तिं द्राग्मलयमरुदाधूतविटपा
वितीर्यात्मच्छायां सकरुणमवन्ति श्रितवतः ॥ २१ ॥

धनायान्धाः कामोपहतमतयो द्वेषकलुषा
महारोगग्रस्तास्सततमपमृत्युप्रणयिनः ।
अविद्वांसः सत्यं विहितपरहिंसाभिरुचयः
कथं सौभाग्यं तेऽमितमनुभवेयुः पुरनराः ॥ २२ ॥

अमोघैर्द्रव्यौघैः सदनशतमभ्रङ्कषशिरो-
गृहप्रेङ्खच्चित्रध्वजपटलरोचिष्णु रचितम् ।
अधिप्रस्थं तेऽद्रिप्रवर ! वरसुभ्रूभिरनिशं
रमन्तेऽध्यासीना विषयसुखलोभेन धनिनः ॥ २३ ॥

समीरे पाटीरद्रुमपरिमलोद्गारचतुरे
कुमुद्वत्याश्लेषङ्कलयति कलानामधिपतौ ।
अधिज्यं प्रद्युम्ने धनुरधिकमाधून्वति मुहु-
र्व्यथां हृद्यां काञ्चिद्युवजनमनांसि द्रुतमधुः ॥ २४ ॥

चिरादाकाङ्क्षन्तीमति[1]बलवशामप्यवसरं
विजानन्नोलम्ब ! त्वमनुभव कामं कुसुमिताम् ।
इमां वल्लीं स्निग्धामिति मदिरनेत्रा विलसितै-
रपश्यन्तीवान्यं तरुणमभणत्काप्युपवने ॥ २५ ॥

उदञ्चद्भ्रूवल्लिः प्रणयकलहेन प्रियतमे
परिष्वङ्गं कुर्वत्यनुनयवचोभिः सरभसम् ।
परं संमन्वाना स्तनयुगळसङ्घर्षणसुखं
शनैराचिक्षेप प्रियकरयुगं कापि तरुणी ॥ २६ ॥

स्मरार्ता प्राणेशं चिरमधरपानैकरसिकं
निवार्य द्राक्सार्चीकृतनिजमुखाब्जेन चतुरा ।
सहासं प्रोवाच " स्पृशसि यदि नीवीं त्वमधुना
विदध्यां शिक्षां ते नियतमि"ति काचिद्दरतनुः ॥ २७ ॥

---

1. अतिबलो = वायुः ।

कबर्याः स्निग्धाया ग्रथनमिषतः कापि युवतिः
कथञ्चिद्विस्रंस्य स्वयमुपरिवासोऽम्रसदृशम् ।
मुहुर्बाहूत्क्षेपैस्तरुणतरमेकं वशयितुं
व्यनक्ति सामूलं पृथुलनिजवक्षोजयुगळम् ॥ २८ ॥

समुत्क्षिप्य क्षौमं विहरति मरुत्येकसुतनू-
रुदग्रभ्रूभङ्गं स्तनयुगसमाच्छादनविधिम् ।
पुरो यूनः कस्याप्यसकृदभिनिन्येऽपि तु परं
व्यभातामूरू द्वौ मदनविजयस्तम्भसदृशौ ॥ २९ ॥

अदर्शः किं ? कामोपम ! मम पतिं पर्वतभुवि
प्रवासी नायास्यत्यचिरमथवा यामि सदनम् ।
ब्रुवाणेत्थं नैवोदचलदसकृद्वीक्ष्य कमपि
स्वनिःश्वासोत्कम्प्रस्तनयुगविनम्रैकरमणी ॥ ३० ॥

निकुञ्जानां पुञ्जा भ्रमरनिकुरुम्बैर्निबिडिता
द्विजैर्नानावर्णैः श्रुतिमधुरगीतैश्च मुदितैः ।
अजस्रं कम्प्राग्राः स्रवदुदकधारार्द्रितपदा
गुहाद्वाराण्यद्रिप्रवर ! भवदीयाः पिदधते ॥ ३१ ॥

गुहागेहं मत्तद्विपशतपृथक्स्थित्यनुगुणं
लताकुञ्जोदञ्चत्सुषुममपि धीरैकसुगमम् ।
प्रतिध्वानैर्भीतिप्रदमजगरैरद्रिसदृशैः
सरित्स्रोतःपातैर्मुखरमधितिष्ठन्ति हरयः[1] ॥ ३२ ॥

सरो रम्यं हंसावलिदलितराजीवमभितः
परिष्वक्ता वेद्यः फलभरविनम्रद्रुविटपैः ।
समुत्प्लुत्य स्वैरं हरिणपृथुकानां विहरतां
गणैः पूर्णा राजन्त्यधिगिरिगुहाभ्यन्तरधरम् ॥ ३३ ॥

पृथक्स्थास्नूनूर्ध्वं, त्वयि भृशमसक्तानिव सतः
समेषां तन्वानाऽनुपविशदिभभ्रान्तिमसकृत् ।
समीक्ष्य ग्रावौघांस्तव शिखरिराज ! ध्रुवमिमे
निपत्याघ्नीरन्वा किमिति मतिमाविभ्रति जनाः ॥ ३४ ॥

महौषध्यो वह्व्यः कटकभुवि रूढास्तव गिरे !
जरामृत्युव्याधिप्रशमनसमर्थप्रकृतयः ।
न बुध्येरन्सर्वे परमपि तु पारम्यमवनौ
ध्रुवं तासां, संविद्रत इव महान्तः कतिपये ॥ ३५ ॥

1. हरयः = सिंहाः

महीध्रप्रस्पर्धिस्तनवनखुमस्रक्सुमधुराः
शबर्यः पर्याप्तं सुरतसुखमश्नन्ति निभृतम् ।
ततं नक्तं ज्योतिर्व्रततिततिविद्रावितमः-
प्रचारं त्वद्रन्ध्रोदरगृहमुपाश्रित्य दयितैः ॥ ३६ ॥

स्फुरद्रत्नोद्रिक्तद्युतिनिकरपूराङ्कुरहरि-
त्समुन्नम्रक्रूरोरगवरशिरःकम्रशिखराः ।
पटीराः कान्तारोदरतिमिरसंहारचतुराः
सदा दीपस्तम्भश्रियमचल ! बिभ्रत्यनुपमाम् ॥ ३७ ॥

समावृत्य स्कन्धैरजगरशरीरोरुगुरुभि-
र्भृशं द्राघीयोभिः सविधमुपयातान्वनमृगान् ।
ग्रसन्ते मांसाशाः कतिचन महान्तः क्षितिरुहाः
परीता दुर्दर्शैश्शिखरिभिरिवास्थ्नां समुदयैः ॥ ३८ ॥

उदग्रक्षुत्क्षामाः कतिचन तरक्षुप्रभृतयः
स्फुलिङ्गानक्षिभ्योऽसकृदिव वमन्तोऽमितरुषा ।
निशीथिन्यां सत्वा विपिनभुवि निर्वर्त्य मृगयां
स्वपन्त्यह्नि च्छायाद्रुमतलमधिश्रित्य निभृतम् ॥ ३९ ॥

वहन्तो माद्यन्तस्त्वदवयवतौल्यं कतिपये
द्विपा वप्रक्रीडां नयनकमनीयां विदधते ।
तरूनुन्मथ्नन्तः कतिचन समूलं स्वरदनै-
श्चरन्ति स्वच्छन्दं वनभुवि करेणुप्रणयिनः ॥ ४० ॥

अदृष्टात्मानस्त्वत्पदविपिनतोऽन्यत्र जगति
स्फटाभिः प्रोच्चण्डा हरिततरगात्रा विषधराः ।
जयन्त्यद्यापीति क्षितिधर ! कतिभ्यश्चिदसकृ-
द्भुवद्भ्यस्सन्दृश्य स्वयमिह वयं संशृणुमहे ॥ ४१ ॥

समुन्मीलन्मल्लिप्रसवसरदिन्दिन्दिरपुर-
न्ध्र्युपक्रान्तश्रोत्रामृतरुतसमाध्मातहरितः ।
वनान्ताः प्रत्यग्रद्रुतकनकलिप्ता इव दृशो-
श्चकासत्यस्तक्ष्माधरनिपतदर्कद्युतिभृतः ॥ ४२ ॥

शिरस्यग्निं बिभ्रत्तरुनिकरसङ्घर्षजनुषं
समुद्गच्छद्रोचिःकबलितविषूचीनतमसम् ।
अहिंस्रस्त्वं मूर्त्या परमनुकरोषि स्फुटतरं
श्रुतं शश्वत्खण्डान्तरविलसदग्निक्षितिधरम् ॥ ४३ ॥

क्वचिच्छुभ्रैरभ्रैः क्वचन परिपिङ्गव्रततिभि-
र्हिमाद्रिं हेमाद्रिं युगपदनुकर्तुं प्रभवसि ।
अरण्यान्या वन्ध्यं कलयसि च विन्ध्यावनिधरं
त्वदीयं सौन्दर्यं विलसति हि दूरे कविगिराम् ॥ ४४ ॥

महत्याः पङ्क्त्यास्ते बहुविषयविश्रान्तवपुषः
प्रथन्ते [I]विच्छेदाद् द्विपनियुतदघ्नावटतटाः ।
अधस्ताद्द्रष्टॄणां सपदि बत! मूर्धभ्रमकृतो
दधानाश्शार्दूलैः परिवृतमरण्यं धृतिहरम् ॥ ४५ ॥

किरञ्ज्योत्स्नासारानुपरि तव निष्टप्तरजत-
द्रवस्रोतःकल्पानमृतकिरणोऽयं निजकरैः ।
प्रकृत्या श्रीमन्तं कलयति भवन्तं शिवगिरे-
रखर्वं गर्वं द्राग्दळयितुमयत्नेन चतुरम् ॥ ४६ ॥

निरुन्धानं वर्त्म त्वदवयवमेकं शिखरिणं
विदार्य द्राघिष्ठं निरमिमत [II]रन्ध्रं कतिपये ।
व्रजन्त्येतेन श्रीफणिपतिपुरं धूमशकटाः
क्षमाभृत्त्वं द्रुह्यत्स्वपि बत! विमुक्तं न भवता ॥ ४७ ॥

---

I. Gap. II. Tunnel.

क्षमामाबिभ्राणा अपि मृगबलोद्विग्नहृदया-
श्चरन्तस्सत्पक्षैरुपरि पथि शाखाप्रणयिभिः ।
द्विजास्सम्भूयोच्चैश्शिखरमधिरोहन्ति सुधियो
भवेत्तेषामैक्यं यदि, जगति किं वा न सुलभम् ॥ ४८ ॥

द्विजा मूर्धानं ते क्षितिधर! डयन्तेऽद्य परितः
समिन्धानं भिन्दानमिव दिवमभ्रौघसुभगम् ।
सजातीयानस्मानिह भुवि विसृज्य द्रुततरं
सदान्योन्यद्रोहप्रसितमतयो हि द्विजनयः ॥ ४९ ॥

अधस्तात्पश्येयं यदि शिखरमारुह्य परितो
निरूर्मिर्भायान्मे जलधिरपि नीलास्तरणवत् ।
तथा दीप्येरंश्च प्रवरसरितो भूमिफलके
कृता वक्राकारा द्रुतरजतरेखा इव गिरे! ॥ ५० ॥

सहस्रं सत्वास्त्वां वितरणिनमाश्रित्य सुचिरं
प्रपुष्टाङ्गाः प्राणन्त्यपरिमितहर्षानुभवतः ।
क्षमायां निम्नायां धरणिधर! नैवं तनुभृतः
प्रकृत्या तुङ्गानां श्रयणमतिसौख्यं वितरति ॥ ५१ ॥

प्रकल्पन्ते हिंस्रा अपि विपिनसत्वा बहुविधाः
परिष्कारायैव प्रबलतिमयोऽब्धेरिव गिरे।
यदीमान्नाव्यास्त्वं जगति न हि भव्यं जनिमतां
सतां रक्षारीतिर्विलसति हि लोकोत्तरतरा ॥ ९२ ॥

अभीक्ष्णं संरक्षां निरुपमकृपस्त्वं तनुभृतां
सरिद्भिः पुण्याभिर्विदधदवनीभृत्परिवृढ ।
श्रितानामानन्दं जनयसितरामत्र तु वयं
विचार्याप्याश्चर्यं मनसि कलयामो न किमपि ॥ ९३ ॥

विशीर्णानां श्रीणां प्रतिसुभगभावं समुदयः
समिन्धानां कम्रः श्रयति परिणम्रस्तव तनुम् ।
अखर्वं त्वं गर्वं धरसि यदि दुष्येर्न च ततः
प्रकाशं किं वह्नेः स्थगयितुमलं धूमपटलः ॥ ९४ ॥

निवेद्य स्वोच्छिष्टं फलसमुदयं भक्त्यतिशया-
ज्जगद्वन्द्याय श्रीरघुपरिवृढायातिजरठा ।
परां मुक्तिं प्रापन्मुनिवरदुरापां सपदि या
तवाध्यासाच्चक्रे गिरिवर ! वनं सापि शबरी ॥ ९५ ॥

समुत्तुङ्गं शृङ्गं तव समधिरुह्यानिलसुतः
पुरं लक्ष्यीकुर्वन्दशवदनदोर्भिस्समवितम् ।
अकूपारं तीर्त्वा जनकतनुजानन्दमकरो-
त्तदङ्घ्रिस्पर्शेन त्वमपि कृतकृत्यस्समभवः ॥ ९६ ॥

भवत्प्रत्यन्तोर्वीधरपरिसरारण्यमनिशं
परिष्कुर्वन्शास्ता हरिहरसुतस्सर्वजगताम् ।
चिरस्य स्वग्रामानवति करुणापाङ्गवलनै-
स्त्वमेवैको भाग्यं परमिदमलब्धाश्शिखरिषु ॥ ९७ ॥

पुरा विन्ध्याद्रिं यः स्वमहिमविशेषान्न्यगकरो-
त्क्षुधा वातापिं यो जठरदहने दैत्यमजुहोत् ।
अगस्त्यः सोऽपि त्वां सततमधिशेते मुनिगणै-
रहो ! माहात्म्यं ते जगति गदितुं कः प्रभवति ॥ ९८ ॥

मया दृष्टा सीतेत्यनिलसुतवाक्यश्रवणतः
कपीन्द्रा माद्यन्तो दधिमुखमनादृत्य तरसा ।
बभञ्जुः स्वैरं यत्त्वयि समभवत्तन्मधुवनं
प्रसिद्धिः पौराणिक्यहह ! भवतोऽद्रे ! विजयते ॥ ५९ ॥

महेन्द्राद्रे ! हृद्यैरमलवलभिन्नीलमणिभिः
कचित्पुञ्जीभूतैरिव विरचिता ते तनुरियम् ।
समुद्दीप्ता श्रीमद्दिनकरकराणां व्यतिकरा-
दहो ! स्पर्धां बध्नात्यतिसुभगवैकुण्ठवपुषा ॥ ६० ॥

चिरं कृत्स्नां पुष्णन्नवनिमचलेन्द्राच्युत इव
प्रतिष्ठां सम्प्राप्य त्वमिह विजयेथास्स्थिरतराम् ।
व्रजाम्यर्चाङ्कर्तुं मलयमनिलस्य प्रभवतो
भुवि स्तादाकल्पं मम शिखरिपारम्यमनघम् ॥ ६१ ॥

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
पर्वतपारम्यन्नाम तृतीयो विलासः ।

# प्रकृतिविलासकाव्ये

## समीरसमर्हणं नाम

## चतुर्थो विलासः

---

धृतिमविरतं तन्याच्छ्रीमान्मरुत्तनयोऽमितां
    सरिदधिपतिं तीर्त्वा लङ्कां जवेन विवेश यः ।
यमभिदधते शिष्यं मुख्यं रवेः परमात्मनो
    रघुपरिवृढो येनाजस्रं मुदा हृदि भावितः ॥ १ ॥

कलयतितमामाह्लादं मे गिरिर्मलयाभिधो
    यमिममनिलोऽध्यासीनोऽस्मिञ्जगत्यभिनन्द्यते ।
परिमलभरैः पाटीराणां भृशं परिपोषितो
    विषधरशतैराक्रान्तानां चिरन्तनजन्मनाम् ॥ २ ॥

धरणिदिविषन्नन्दन्नेवं गिरेः परिदर्शना-
    त्तवनकुसुमैरानर्चायं वनान्तसमीरणम् ।
विकचकुटजैः प्रस्थप्रान्ते नितान्तमनोहरे
    कुसुमिततरुच्छायास्निग्धं निषेव्य शिलातलम् ॥ ३ ॥

निखिलजगतां मुख्यः प्राणः परा ह्यसि देवता
श्रुतिरपि भवत्तत्वं वक्तुं बिभेति सुदुर्ग्रहम् ।
कथमिव जडः शक्तः स्तोतुं भवन्तमहं विभुं
पृथुकभणितं श्रुत्वैतत्त्वं प्रसीद पितोपमः ॥ ४ ॥

समधिकबलस्त्वं भूतानां समीर! विराजसे
भवदभिमते मार्गे तानि प्रवर्तयसि द्रुतम् ।
अतिशयितुमुत्पश्यान्यस्त्वां प्रभुः क इह क्षितौ
प्रकृतिवशगोऽप्येको लोके पराक्रमसे स्वयम् ॥ ५ ॥

भ्रमति सततं पृथ्वीगोलं सशैलवनं मह-
द्दिवसकृदुदेत्यस्तं याति क्षपास्वपि चन्द्रमाः ।
सलिलनिधयोप्यूर्मिक्षोभैश्चलन्ति, शिखी ज्वल-
त्यखिलमपि ते लीलामात्रं समीर! विदुर्बुधाः ॥ ६ ॥

किमिह वचसां गुम्फैस्तत्वन्त्विय[1]द्वयसं विभो!
जगदखिलमप्याविष्टं स त्वयैव विचेष्टते ।
वहसि यदधीकारं कृत्स्नं महेश्वरतः प्रति
प्रकृतिवशगं भूतं सर्वं त्वयैव नियन्त्रितम् ॥ ७ ॥

---

1. वतवन्तात्स्वार्थे द्वयसच्

विपरिणमयस्याद्यं भूतत्रयं बहुधा सकृ-
न्न वियति परं नीरूपेऽस्मिन्पराक्रमसे मरुत् ! ।
किमपि न भवान् शक्तः कर्तुं प्रभौ त्वदपि ध्रुवं
दधति बहवः स्वाधीकारं विशिष्य तपस्विषु ॥ ८ ॥

किमपि किमपि स्वैरङ्कुर्वन्नशीतकताञ्जतो
विहरसि सदा द्यावाभूम्योरमन्दकुतूहलात् ।
चिरसुचरितैरुद्भूतस्त्वं क्रमात्परिपोषितः
शिशुरिव तयोः प्राणेभ्योऽपि प्रियोऽसि सदागते ॥ ९ ॥

अमितवसतिं द्यौरेषा ते ददाति समादरा-
त्त्वमपि विहरन्नत्यन्ताय प्रहर्षभरान्वितः ।
उडुसमुदयैर्मुक्ताकल्पैरलङ्कुरुषे च तां
जयति युवयोर्योगः स्निग्धः परस्परागतः ॥ १० ॥

तरणिकिरणानावृण्वानः प्रचण्डतरं भ्रम-
न्घटयसि घनांस्तूर्णं कौतस्कुतानचलोपमान् ।
सरभसममून्वर्षव्यग्रान्मुहुः परिगर्जतः
सपदि विभजन्नन्तर्धत्से स्वयं कृतकृत्यवत् ॥ ११ ॥

जलदपटलाः सँल्लक्ष्यन्ते त्वया हि समाहृताः
खगमृगनराकाराः केचित्प्रतिक्षणभेदतः ।
कनकशिखरिप्रख्याः सायन्तनातपदीपिता
हरगिरिनिभाश्चान्ये केचित्तमालवनोपमाः ॥ १२ ॥

अनतिकुटिलं रत्नस्तम्भश्रियं दधदायतं
यदतिसुभगं चित्रैर्वर्णैर्धनुर्गगनान्तरे ।
तदपि नियतं चक्षुःप्रीत्यै त्वया विहितो महा-
न्प्रसदनपरीपाकोऽस्माकं मरुत् ! पृथिवीजुषाम् ॥ १३ ॥

नयनहरणव्यग्रोदग्रक्षणस्फुरणाञ्चित-
प्रततहरितो विद्युत्पुञ्जान्पुरः परिदर्शयन् ।
सहभवमपि ध्वानं पश्चाच्छ्रुतौ विनिवेशय-
न्नवजलधरैस्सिञ्चस्युर्वीं जगद्धितकाम्यया ॥ १४ ॥

वियति वितते विष्वद्रीचो वलक्षतर[1]र्क्षरु-
ग्घनसमुदयानद्भिर्वार्धेः प्रपूर्य रवेः करैः ।
नुदसि सहसा लोकस्थित्यै करीन्द्रकरोपमं
कलयितुममून्धारापातं समीर ! समन्ततः ॥ १५ ॥

1. ऋक्षः = भल्लूकः ।

सरिदधिपतौ हास्यं पुष्णन्रसं परिवर्धसे
यदयममितैस्तुङ्गैर्भङ्गैस्त्वयैव विकारितः ।
ह्रियमपि विहायैवं शब्दान्रटञ्श्रुतिदुःश्रवा-
न्नर इव महाभूताविष्टः सदा परिनृत्यति ॥ १६ ॥

कृतपरिकरो रत्नान्यब्धेरवाप्तुमधस्तना-
न्यनिल ! सुचिरं पारे वारीण्यमन्दरयक्षिरन् ।
न किमपि ततोऽलब्धा ह्यन्ते, जहाहि परिश्रमं
जगति मतिमान् को वा कालं वृथैव निनीषति ॥ १७ ॥

क्षितिगगनयोः सम्पत्तोमैश्चिरं परिपोषणे
जलनिधिमृते नान्यत्किञ्चित् समस्ति च साधनम् ।
इति खलु विनिश्चिन्वानस्त्वं तयोरिव मध्यग-
स्तमुपगतवान्प्रेम्णा, नक्तन्दिवं विजिहीर्षसि ॥ १८ ॥

वलभिदुपलाद्रीन्द्रश्रीभृत्तरङ्गपरम्परा-
विरचनकलावैदग्ध्यावर्जिताखिलमानसः ।
मुहुरभिनयैर्हृद्यैस्तन्वन्रसं परमाद्भुतं
चरसि विरुवन्गर्वोद्रेकात्समुद्रमधिश्रितः ॥ १९ ॥

कवचितवियत्प्रान्तप्रेङ्खत्तटित्वदरुन्तुद-
स्तनितजनितप्रत्युच्चण्डध्वनिक्षितिभृद्गुहान् ।
प्रकृतिमधुरान्प्रत्यग्वार्धेस्तटानटवीभृतो
नटनममितं रङ्गीकर्तुं पटु प्रकटं तव ॥ २० ॥

गमयसि तनूर्नावो डोलावदीषदुदञ्चय-
न्नुपरि चलतामूर्म्यद्रीणां निजोर्ध्वलसत्कटाः ।
प्रकृतिरसिकास्त्वल्पे मर्त्या वितीर्य तदातरं
व्रजितुमुदधौ किञ्चिद् दूरं भवन्ति समुत्सुकाः ॥ २१ ॥

कतिचन महानावो यन्त्रैर्व्रजन्ति पुरोपमा
भवदुपकृतिर्यद्यप्यासां प्रभञ्जन ! मैव भूत् ।
त्यज मतिमथाप्येतां झञ्झामरुन्विनिमज्जने
न खलु जनयेदौदासीन्यं मदश्चपलात्मनाम् ॥ २२ ॥

क्षुदुपहतये त्वामास्वाद्य प्रयन्तु भुजङ्गमा
न किमपि ततश्छिन्नं मा गा व्यथां मलयानिल ।
यदतिकुटिला दोषांशांस्ते लिहन्ति कुतूहला-
द्वृजिनहरणे दुष्टात्मानो भवन्ति सतां मताः ॥ २३ ॥

मलयपवन ! स्पर्शैस्तन्वन्सुखं मधुचन्द्रमः-
प्रभृतिषु भृशं स्निह्यन्साम्यं वहत्स्वमितं तव ।
विकृतिमधिकां चेतस्स्वेणीदृशां चपलात्मना-
मभिनिविशसे प्रद्युम्नस्य प्रभोः सचिवोत्तमः ॥ २४ ॥

कुसुमसुभगाः स्तोकं नम्राः फलैश्च पचेळिमै
रसिकमधुपास्वाद्या रागश्रिया हृदयङ्गमाः ।
मृदुळपुळिनाभोगान्प्राप्ता भृशं प्रियदर्शनाः
कनकलतिकाः कूले सिन्धोर्धिनोषि समीरण ॥ २५ ॥

स्तनतटलुठत्सूक्ष्मक्षौमप्रतिक्षणकर्षण-
प्रभवसुभगाक्रोशभ्राम्यद्दृगन्तसमञ्चितः ।
नगररमणीर्गाढं प्रेम्णा परिष्वजसेऽम्बुधौ
पवन ! भवतः सेवां कर्तुं स्वयं समुपागताः ॥ २६ ॥

कचभरसमुद्ग्रन्थे तन्व्याः करौ विनियोजयन्
श्लथयसि शनैः श्लक्ष्णं वासः स्वनन्मणिमेखलम् ।
पृथुलजघना सुभ्रूः किञ्चिन्निगद्य मृदु स्वयं
पुळिनमधरीकुर्वाणेव ह्रिया हि निषीदति ॥ २७ ॥

सरसिजमुखैः पुष्पैः फुल्लैर्दिवा समलङ्कृतां
प्रकृतिवनितां नक्तं जाग्रत्सुमैः कुसुदादिभिः ।
ललितललितैर्नृत्यैर्नित्यं मनोहरिणीं प्रियां
रमयसि वने गाढाश्लेषैः समीरण ! कामुकीम् ॥ २८ ॥

वरतनुशतै रक्तैः स्वैरं विहर्तुमनर्गळा-
मधिकृतिमिमां रुन्धां को वा तवातिमनोहराम् ।
अभिनवसुमप्राग्भारास्त्वं लता निधुवन्बला-
दनिल ! भुवि न ह्यारामाणामिनैः प्रतिषिध्यसे ॥ २९ ॥

भृशरयवशोदञ्चत्फेना कळिन्दगिरीन्द्रजा
शिखरिणि यदि स्यन्देतोर्म्युद्गमैस्सिकतामये ।
अधरयति तां लक्ष्मीं वेणी त्वया शिथिलीकृता
विकचकुटजा तन्वङ्गाया नितम्बविलम्बिनी ॥ ॥ ३० ॥

शमयसि दृशामाशां पातुं प्रभञ्जन ! जृम्भितां
सरिदधिपतेस्तीरे यूनां भवत्प्रियकाङ्क्षिणाम् ।
असुलभतरैः स्त्रीणामङ्गैर्मुहुः स्फुटताङ्गतैः
श्रितजनमनःप्रीत्याधानं वदान्यकुलव्रतम् ॥ ३१ ॥

कुवलयदृशः श्यामा हर्म्यस्थलैकनिवासिनी-
स्सुरतविरतौ श्रान्ता वातायनैर्विवृतैर्भजन् ।
कुसुममृदुळान्यङ्गानि द्राक् सुखं परिमृज्य च
श्रममपनुदंस्तासां, निद्रां ददास्यनुकम्पया ॥ ३२ ॥

नृपदुहितरः प्रत्याचख्युः पुरा भवदर्थनां
कतिचन, तदा क्रुध्यंस्ताभ्यस्तनूर्हि बभञ्जिथ ।
किमिदमुचितं ? राजर्षिस्त्वां पितापि स चक्षमे
विनयविधुरा माद्येयुः खल्वखण्डितवृत्तयः ॥ ३३ ॥

ध्वजपटसमाः क्षौमीः स्त्रीणां समीरण ! मन्यसे
त्यज धियमिमां क्षुद्रां साध्व्यो भवन्ति सहस्रशः ।
तव पुनरिदं सम्मन्वीरन्न तास्तु विचेष्टितं
श्रियमपहरेत्पातिव्रत्यं प्रधर्षितमञ्जसा ॥ ३४ ॥

किमपि कुरुषे नैवाऽऽनम्राञ्शरान्मृदु संस्पृश-
न्विटपिनिवहान्नैवम्भूतान्निपातयसि क्षणात् ।
स्वयमविनयं धत्से स्त्रैणे द्विदण्डयिषुः परा-
न्न खलु सहते स्वीयं दोषं परत्र सुधीरपि ॥ ३५ ॥

भुवनमहितौ शौर्याम्भोधी सुतौ त्वमजीजनो
निशिचरकुलान्युन्मूल्यैकस्तयोर्भुवि पप्रथे ।
कुरुसुतशतस्यासीदन्यो यमः स वृकोदरो
बत ! समुदभूत्ताहग्वीरो न कोऽपि सुरेष्वपि ॥ ३६ ॥

परिणतफलभ्रान्त्योत्प्लुत्याग्रहीदुदितं रविं
जननसमये त्वत्पुत्रो द्राक् पराक्रमशेवधिः ।
पवन ! पविनाऽऽजघ्ने शक्रः सुपर्वभिरर्थितः
शिशुरपि गुरुर्धाम्ना, यस्माददामि बलद्विषा ॥ ३७ ॥

प्रियसुतमभिद्रुह्यत्सु द्राक्सुसंहृतवृत्तिको
न्यविशत भवान्क्रुद्धोऽत्यन्तं महीधरकन्दरे ।
अदधत सुराः प्रेतावस्थां निरुच्छ्वसितास्ततः
समनुनयतो ब्रह्मादीनां समान् समजीवयः ॥ ३८ ॥

दशमुखगृहेष्वन्विच्छन्श्रीरघूत्तमभामिनीं
वरमृगदृशः सुता हन्त ! त्वयैव विवस्त्रिताः ।
व्यकुरुत मनागप्युद्वीक्ष्य स्वयं न हि ते सुतः
कपिरपि महामान्योऽद्रिक्षद्यतस्तव पद्धतिम् ॥ ३९ ॥

भुजगपतिना मूर्ध्नैकेन श्रमादपिधाय च
प्रधृतमपि ते शक्त्या शृङ्गं गिरेः समचालयः ।
दिवि भुवि भवत्कल्पो नान्यः प्रकम्पन ! किन्त्वहं
विनयमधुरं वीर्यन्नास्ति त्वयीति सुहृद् ब्रुवे ॥ ४० ॥

श्रमभरमपाकुर्वञ्छायाद्रुमैर्मृदुकम्पितैः
परिणतफलैः स्वाद्यैर्निघ्नन्क्षुधं भुवि पातितैः ।
सरससलिलैस्तृष्णां मुष्णन्सरित्सरसीसुतै-
श्चरसि पवनातिथ्यं हृद्यं वनान्तमुपेयुषाम् ॥ ४१ ॥

असमकुसुमामोदैर्घ्राणं सदा परितर्पय-
ञ्शिशिरपृषतानम्भोजिन्याश्शनैः परितः किरन् ।
क्लममपि समं दूरे कुर्वन्स्पृशन्सुखमादरा-
दनिल ! कलयन्नाह्लादं नः समर्हणमर्हसि ॥ ४२ ॥

क्वचन समये जातावेशो भनक्षि वनस्पती-
न्कुसुमितलताश्लेषाद्रम्यानुपघ्नतरानपि ।
अतिबल ! कथं शृङ्गारी सन्निदं न विबुध्यसे
विमृश वृजिनं दाम्पत्यस्य च्छिदा जनयेन्न किम् ॥ ४३ ॥

द्विरदसदृशा गण्डाश्मानो भवन्ति दरस्पृशो
निजबलपरिज्ञाने यत्नं त्वमेष्वपि मा कृथाः ।
यदि वितनुया ग्रामा न स्युर्महीध्रपदाश्रिताः
सपदि विपदः सूते दर्पोद्धतस्य विचेष्टितम् ॥ ४४ ॥

कति विनिरमाः संवर्तास्त्वं प्रकम्पन ! वेद को
न जहति पुनस्संस्कारास्त्वां चिरानुभवाहिताः ।
त्वमसि रसिको यद्भावानां विपर्यसने भृशं
पुलिनमभवत्स्रोतो, दृष्टस्तथैव विपर्ययः ॥ ४५ ॥

वनमुदभवद्रम्यं भव्यं दृशोः क्वचन द्रुमैः
क्वचन सिकताकान्तारो द्राक्पिधाय महाटवीम् ।
तदिदमखिलं त्वत्कृत्यं हि व्यनक्ति विशेषतः
सकलजगतामीशस्यान्तर्नियामकतां मुहुः ॥ ४६ ॥

विभुरपि भवान्प्राणाद्यात्मा शरीरिषु चेष्टसे
प्रतिनिधिपदं प्रेमस्थानं वहन्परमात्मनः ।
त्वयि सति परो जीवस्तिष्ठत्यपैति विपर्यये
करणनिवहैः कार्यैर्वान्यैः फलं न हि केवलैः ॥ ४७ ॥

लवणमिलनाद्दुष्णो मुष्णन्रुजां विविधां नृणां
निरुपमकृपः पारावारप्रदेशमुपेयुषाम् ।
शिखरिशिखरे सौख्यं पुष्णन्महौषधिमिश्रणा-
द्धितकृदगदङ्कारो भासि प्रकृत्युपकल्पितः ॥ ४८ ॥

नगरमनुजा मिष्टान्नैरप्यपुष्टकळेवरा
विपिनभवना वृद्धाः स्वैरं चरन्ति युवोपमाः ।
प्रकृतिशुचिरस्या[1]तश्चायुर्ददासि वने सतां
पुरनरदुराचारैर्दुष्टो यमाय हि कल्पसे ॥ ४९ ॥

श्वसन ! सुखिनस्तिर्यञ्चोऽपि ह्यरण्यनिवासिनः
किमधिकगिरा त्वामासेव्य द्रुमा अपि निर्मलम् ।
स्वसुखविमुखा मर्त्यास्त्वेते कुतर्कशतप्रिया
न जहति पुरं प्राणापायेऽप्यधर्मपरायणाः ॥ ५० ॥

सुखवसतये शान्तप्रान्तान्वनान्तमुखान् शुभा-
न्निरवधिघृणापूर्णोऽस्मभ्यं वितीय जगत्प्रभुः ।
न्ययमयदमुं त्वां नस्त्रातुं, विवेकलवोज्झिताः
पतितुमवटं ह्यन्विच्छामः स्वयं प्रकृतिद्विषः ॥ ५१ ॥

---

1. अतइत्यर्थ आतइत्यव्ययम् ।

विपुलसिकतारण्यप्रान्ते बहिर्भरतक्षिते-
र्दधति विरळान्खर्जूरद्रून्दुरापजलाशये ।
समधिकभरैरारुह्योष्ट्रान्सदा व्रजतो जना-
न्सपदि पिदधास्युत्कीर्णैस्त्वं प्रभञ्जन ! पांसुभिः ॥ ५२ ॥

अवनिजठराभोगोदीर्णप्रणालिकयोद्गतः
क्षितिधरशिरस्सप्तार्चिस्त्वत्प्रचण्डपरिक्रमैः ।
विहितपृथिवीकम्पः प्रेद्धः स्वमप्यतिताम्रय-
न्नगरनिकरान्हन्त्युद्भ्रान्तैर्दृषद्द्रवनिर्झरैः ॥ ५३ ॥

भवदपिहिता जीर्णा वृक्षाः क्षितौ शरदां शतं
परिणततरेङ्गालात्मानो व्रजन्ति च हीरताम् ।
स्वमिळनवशादुर्व्यास्तैलं ददत्यपरेऽमितं
कतिचन महायन्त्रौघानां भवन्त्युपकारिणः ॥ ५४ ॥

व्रजमृगदृशां वृन्दैः कूले तमालवनाकुले
दिनकरतनूजाया ज्योत्स्नासिते परिखेलतः ।
चिरविहृतिजां श्रान्तिं दूरेऽकृथा वनमालिनः
कुवलयदळश्यामाङ्गानामभीक्ष्णविमर्दनैः ॥ ५५ ॥

विमलवलभित्रीलाश्माद्रिव्रजप्रतिमोर्मय-
स्तपनदुहितुर्निम्नावर्तप्रभेदभयङ्कराः ।
कलिमलहरैस्तुङ्गैर्भङ्गैस्त्वया व्यतिकारिता-
स्त्रिदिवसरितः कर्पूरोर्वीधरप्रतिशात्रवैः ॥ ९६ ॥

विपुलमतुलश्रीलास्यं यत्परीतगिरिव्रजं
विमलसलिलोन्मीलत्पद्मोल्लसत्कलहंसकम् ।
अनु हरगिरिप्रान्तं चक्षुःफलं विदधत्सर-
स्तदपि भवतः क्रीडास्थानं प्रसिद्ध्यति मानसम् ॥ ९७ ॥

हिमगिरिदरीद्वारोदाराखामरनिम्नगा-
सततपतितश्वेतस्रोतस्तरङ्गपवित्रितम् ।
मरकतमणीवर्णैर्घासैस्तलं समलङ्कृतं
पवन ! सुखमध्यासीनस्त्वां पुरानुभवामि किम् ॥ ९८ ॥

बिभृहि सततं सम्राट्स्थानं त्वमेव सुपर्वणा-
महमपि मुदा सम्मन्वे तत्सुहृद् गतमत्सरः ।
प्रकृतिचपलो मोपेक्षिष्ठाः परन्तु समीर ! मां
न खलु गणयत्याढ्यो वर्गः सयेन तपस्विनम् ॥ ५९ ॥

त्वमसि सततं सर्वत्र त्वं बिभर्षि समं जग-
त्त्वमसि च महान्देवोऽध्यक्षस्त्वमस्यखिलप्रदः ।
श्रुतिशिरसि संवर्गः ख्यातस्त्वमेव गतिर्मम
प्रशमय महारोगान् शीघ्रं प्रसीद सदागते ॥ ६० ॥

तव गतिमहं रुन्धन्स्वैरं चिरात्समभाषिषि
श्वसन ! विरसा वाचो मित्र ! क्षमस्व दयान्वितः ।
वितर पटुतां स्तोतुं मह्यं वियत्सरितं शुभां
भुवि विजयतामाचन्द्रार्कं समीरसमर्हणम् ॥ ६१ ॥

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
समीरसमर्हणं नाम चतुर्थो विलासः ।

# प्रकृतिविलासकाव्ये

## त्रिपथगासौभाग्यं नाम

## पञ्चमो विलासः ॥

---

हिमाद्रिवरनन्दिनीमखिललोचनानन्दिनी-
मुपेन्द्रपदवन्दिनीमसमदृक्शिरस्स्यन्दिनीम् ।
अघौघपरिमर्दिनीं सुभगभङ्गसन्नर्दिनीं
त्रयीविपिनकेकिनीं प्रणिपतामि मन्दाकिनीम् ॥ १ ॥

सुधीकुलशिखामणिः क्षितिसुपर्वमुक्तामणि-
र्भगीरथपथानुगां प्रकृतिसिद्धमानोज्ञकाम् ।
निरीक्ष्य भृशविस्मयस्तिमितदृक्स्तुतिप्रक्रमैः
स भक्तिविनयान्वितः शुभपदैरुपातिष्ठत ॥ २ ॥

अवाङ्मनसगोचरान् गुणगणांस्त्रिमार्गोद्गमे
फणाभृदधिपोऽपि न प्रभवति प्रवक्तुं यदि ।
स्तुयां कथमनक्षरः शिवशिरःपरिस्पन्दिनि !
क्षमस्व कृपयाम्बिके ! सरभसप्रवृत्तिं मम ॥ ३ ॥

पवित्रतरवारयः स्फुरदनघवज्रव्रज-
च्छविच्छुरितदिङ्मुखप्रसृमरोर्मिसम्मूर्च्छिताः ।
जगत्त्रितयसत्त्ववृत्त्युपचितस्वरूपाः स्मृता
हरन्तु दुरितानि नस्त्रिपथगाझरा मेदुराः ॥ ४ ॥

निकुञ्जपरिरञ्जितद्रुमकदम्बनीरन्ध्रित-
स्फुरद्धिमदृषत्क्षरत्प्रथमवारिपूरोद्गमा ।
तुषारगिरिगह्वरोदरविनिष्क्रमाद्बन्धुरा
पतन्त्यवतु मौक्तिकग्रथितहारराजीव नः ॥ ५ ॥

अधिक्षिति पतिष्णुनिर्झरपृषन्ति पार्श्वद्रुम-
प्रसूनभरसौरभप्रसभचौर्यबद्धोद्यमः ।
निसर्गशिशिराण्यघप्रशमनैकवीरव्रता-
न्यमन्दरयमुत्किरन् मरुदपाकरोति श्रमम् ॥ ६ ॥

सभक्त्यतिशयं स्वयं विपिनदेवताप्यन्वहं
तटोपवननिर्झरद्रुमसुमैः समभ्यर्चति ।
उदग्ररयनिर्झरोर्म्युरुविरावभूरित्रस-
द्धरिद्विजघटार्भटां नटनलम्पटां स्वर्धुनीम् ॥ ७ ॥

अहस्करकरद्रुतामितहिमौघसंवर्धित-
प्रवाहपरिवर्तितद्रुमकुलायपत्रिव्रजा ।
कराळतरवक्त्रदर्थनृजुतीक्ष्णदंष्ट्रोल्लस-
त्पलौघमकराकुलह्रूदशतावताज्जाह्नवी ॥ ८ ॥

ससम्भ्रमसमुत्पतन्निपतदा[1]तिरूर्म्युद्धुत-
प्रफुल्लकमलोच्चलद्धहळमल्लिकाक्षोज्ज्वला ।
विवृत्तमृदुळोदरक्षणिकचित्रवर्णप्रभा-
तरङ्गितझषाकुला सुरतरङ्गिणी राजते ॥ ९ ॥

विराजति समुद्रजद्गिरिसहोदरोर्मिव्रज-
प्रलूनतरमूलभूरुहसहस्रवेलाकुला ।
सहस्रमदसिन्धुरद्वयसभीकरावर्तभा-
क्पटीरतरुकोटरोरगवरा सुरह्रादिनी ॥ १० ॥

विभान्त्यमितवीचिपङ्क्त्युदितफेनपुञ्जाञ्चित-
प्रकम्प्रदळमर्मरारवतमालमूलस्थलाः ।
तटोपवनपाटलप्रसवपातशोणप्रभा
वनान्तरविनिर्गतास्त्रिपथगाझरा झर्झराः ॥ ११ ॥

---

1. आतिर्जलचरपक्षिविशेषः

मराळमहिळापरिक्रमणबन्धुराब्जोल्लस-
न्मदान्धमधुपाङ्गनाकलितगीतिरीत्यञ्चिता ।
तरङ्गपरिवर्तनप्रसितमारुतप्रेङ्खित-
व्रजत्पृथुलनौशतध्वजपटाटति स्वर्णदी ॥ १२ ॥

मनोज्ञतरसैकतस्थलसमुल्लसद्वेतसा
समीरधुतकेतकोद्दळितधूळिसान्द्रामृता ।
हिमोपमसुमोद्गमासम[1]शरावळीमञ्जुळा
विलोचनफलं दिशन्त्यमरशैवलिन्येधते ॥ १३ ॥

चकासति झरा वधूकरनिघृष्टहारिद्रक-
द्रवव्यतिकरोन्मिषद्रुचिररुक्मवर्णार्णसः ।
वयोनुगुणविभ्रमस्फुरणगौडसुभ्रूस्तन-
प्रमृष्टहरिचन्दनप्रगुणितश्रियस्त्र्यात्मनः ॥ १४ ॥

निगूढकुचमण्डलप्रवरगौडसीमन्तिनी-
गभीरशुभनाभिसङ्गमसमुद्भवोरुभ्रमः ।
विलोलघनकुन्तळश्लथितपुष्पमाल्योद्गळ-
त्सुगन्धिमधुपङ्किलः स्फुरति गाङ्गभङ्गोद्गमः ॥ १५ ॥

---

1. शरस्तृणविशेषः ।

दृषन्निकरदन्तुरस्थलचलन्महोर्म्यारवः
प्रवृद्धतरतीरभूधरदरीप्रतिश्रुन्त्यलम् ।
विधातुमधिकाद्भुतं विबुधदीर्घिकास्रोतसां
निमज्जदिभयूथपह्रदबृहन्ति बृन्दानि नः ॥ १६ ॥

झषोत्प्लवनकाङ्क्षिदृङ्निभृतगात्रतीरश्रित-
क्षुदार्तत्रिसकण्टिकाशतसुखासिकोल्लासिनी ।
अमन्दजवचङ्क्रमप्रवलनक्रचक्रत्रस-
त्तिरोहितजलाण्डजा जयति जह्नुकन्यानघा ॥ १७ ॥

प्रमत्तमधुपच्छविच्छिदुरपक्वजम्बूफल-
प्रपातपरिपाटलद्युतिरमर्त्यकल्लोलिनी ।
क्वचिच्च वरवर्णिनीश्रवणभाग्दृगिन्दीवर-
प्रमृष्टरुचिराञ्जनाञ्चिततनूर्नरीनृत्यते ॥ १८ ॥

प्रचण्डरवसम्प्लवप्रसभमज्जितारण्यक-
च्छदोदवसिताऽनघद्विजकुलायनिर्मूलिनी ।
निगीर्णमदवारणाजगरमण्डलाकर्षिणी
भयङ्करतरा सरित्सुमनसां प्रचङ्क्रूर्यते ॥ १९ ॥

मरालकुलकौतुकोत्पतनसंशयाधायक-
प्रभञ्जनसमुद्धुतोर्म्युदितफेनपुञ्जाञ्चिता ।
मदोत्कटतटाटवीकरटिराड्भिरत्युद्भटा
त्रिविष्टपतटिन्यटत्यविरतं रटन्ती स्फुटम् ॥ २० ॥

लसन्मृदुळशैवलोपलतलस्खलद्वीचिका-
प्रनृत्यदुदकस्रुतिप्रहिततूलरोचिःकणान् ।
प्रकीर्य हरति श्रमं रतिसमुद्भवं सुभ्रुवां
मनोज्ञसुरनिम्नगा तटनिकुञ्जभाजां मरुत् ॥ २१ ॥

तटच्छदकुटीवसन्मुनिहुताग्निधूमोद्गम-
प्रभिन्नरुचिपल्लवद्रुमसमुत्पतद्वायसा ।
अजस्रयजनोत्सुकद्विजपरिष्कृतग्रामका
समाकलितभावुका वहति देवतावापिका ॥ २२ ॥

अनल्पजवपोप्लुवप्रमदधार्तराष्ट्रव्रजाः
समुच्छ्रितवनस्पतिप्रकरमूलभूलोलुवाः ।
पवित्रतरदेवतायतनमण्डलीयोयुवा
जरिहत्तुतरामघं सुरसरिज्झराः पोपुवाः ॥ २३ ॥

मदान्धविपिनद्विपोन्मृदितसप्तपर्णक्षर-
न्निकामघनदुग्धजप्रवरगन्धवेलोज्ज्वला ।
विचित्रतररुक्छदप्रकरशक्रगोपोद्गम-
प्रदीप्रतटशाद्वला लसति लेखशैवालिनी ॥ २४ ॥

सदाप्रतिफलत्तटद्रुमसमुच्छ्रितोर्म्युद्भव-
प्रभूतजलदभ्रमाकलितलास्यबर्हिव्रजा ।
निरस्तमिहिरातपद्रुनिकुरुम्बनीडाण्डज-
प्रहर्षरवनिर्भरा कुतुकमादधात्यद्रिजा ॥ २५ ॥

प्रफुल्लकमलावलीजठरशायिहंसार्भका
वनस्पतिपरिच्युतामितसुमप्रपातार्चिता ।
तृणाग्रमिहिकालवप्रतिफलत्तटाद्रिद्रुमा
प्रभातसुभगां श्रियं परिबिभर्ति भागीरथी ॥ २६ ॥

विशङ्कटतटाटवीकुटजगुल्मवाटीकुटी-
स्फटाप्रकटितार्भटोत्कटनलम्पटाहुड्डटा ।
रटद्विटपिकोटरश्रितकुटुम्बकोयष्टिका
त्रिविष्टपतटिन्यसौ स्वयमटाट्यतेऽपि क्षितौ ॥ २७ ॥

हरिन्मणिसहोदरद्युतितृणाङ्कुरास्वादन-
प्रपुष्टहरिणार्भकोत्प्लवनमञ्जुकुञ्जाञ्चिता ।
सुवर्णरुचिचम्पकस्तबकरेणुविक्षेपण-
प्रवीणतटमारुता त्रिपथगा परिस्पन्दते ॥ २८ ॥

रसालवनपल्लवग्रसनजातसङ्गीतक-
प्रियङ्करवनप्रियाध्युषिततीरचेतोहरा ।
वदान्यतमतीरभूरुहविनम्रशाखोल्लस-
त्फलानि सुरनिर्झरिण्यपचिनोति वीचीकरैः ॥ २९ ॥

मदानवदधद्वधूपृथुनितम्बविस्रंसित-
प्रदीप्तकनकाम्बरप्रकरकर्षणान्तर्जला ।
द्रुतस्नपिततीरगालसपुरन्ध्रिवीचिच्छटा
समेधयति विष्णुपद्युषसि भूरि हास्यं रसम् ॥ ३० ॥

विनिद्रतरकैरवोदरमरन्दसान्द्रीभव-
त्तरङ्गपृषदुत्किरश्वसनमैकताल‌ङ्कृता ।
चकोरवरवर्णिनीहृदयनन्दनेन्दुप्रभा-
मनोज्ञतटकानना स्रवति देवकूलङ्कषा ॥ ३१ ॥

अदभ्रवरविभ्रमाङ्कुरितमारवाराङ्गना-
वशाढ्यतरुणस्फुरत्पुळिनचन्द्रशुभ्रप्रभा ।
किरातवनिताशताकलितकामकेळीलस-
त्तटीविपिनकुञ्जभूर्वहति शन्तनुप्रेयसी ॥ ३२ ॥

स्वभावपरिपीवरस्तननितम्बभाराङ्गना-
परिक्रमणवैखरीजितमराळयोषाकुला ।
अमन्दविरहव्यथाकुलितकोकशोकेन्धन-
क्षपाकरकरप्रभाकवलिताऽयते द्योनदी ॥ ३३ ॥

कनत्कनकसप्रभस्फुटितकेतकाळिस्खल-
त्परागपरिधूसरप्रततसैकतप्रान्तभूः ।
मरुद्विधुतवीरुदुच्चलितचञ्चरीकाङ्गना-
स्वनाकुलितकानना जयति देवनद्यात्मना ॥ ३४ ॥

समादधदृषीश्वराध्युषिततीर्थघट्टाटवी-
प्रशान्तमदकुञ्जरप्रमुखदुष्टसत्त्वार्भटा ।
गळद्बकुळकल्पितास्तरणमूलवेलाद्रुमो-
त्पतत्प्लवगसङ्कुला लसति शैवलिन्यामरी ॥ ३५ ॥

परस्परकुतूहलानमितसल्लकीपल्लव-
प्रवर्धितनिजार्भकद्विरददम्पतिद्योतिनीः ।
कुलायशयशावकव्रजविदारितास्याहित-
स्वधान्यशकुना वनीर्वहति पुष्णती भीष्मसूः ॥ ३६ ॥

निमज्जदुरुयौवतस्तनमहीध्रसञ्चूर्णित-
प्रसक्तशुभकुङ्कुमोच्छ्रिततरङ्गशीर्णाः कणाः ।
अनल्पपरयसम्प्रहृत्युदितरक्तमात्राश्रमं
चिरं विदधतेतरां श्रितवताममर्त्यापगाम् ॥ ३७ ॥

मनोज्ञकलविङ्कसंस्फुरदुदारकेदारभू-
सहस्रनवरुक्मरुक्कलममञ्जरीमञ्जुलाम् ।
विपाकरुधिरारुणच्छिदुरबिम्बरज्यच्छुकां
निषिञ्चति वियत्तटिन्युभयपार्श्वभूमिं सदा ॥ ३८ ॥

निशाटनघटार्भटीमुखरिताटवीपादप-
प्रलीनबलिभुग्भयङ्करविभावरीनिर्भरा ।
मृगेन्द्रदलितेभराट्पृथुलकुम्भपीठीगळ-
न्निरर्घनवमौक्तिका जयति जह्नुकन्यावनी ॥ ३९ ॥

निशीथमृगयाकुलीकृतवनस्थलद्वीपितृ-
इद्रुतप्रशमनक्षमस्फटिकनिर्मलापाशया ।
तटद्विरदफीट्कृतिप्रतिनदन्महीभृद्गुहा-
प्रबोधितमृगादना निशि भयप्रदा स्वर्धुनी ॥ ४० ॥

अजस्रजवकूलमुद्रुजझरोर्मिसांराविण-
प्रकामशमितक्षपाक्षुधितवन्यसत्त्वध्वनिः ।
दृषत्स्थपुटितान्तराप्रहतपूर्वपाणिन्धम-
स्फुटेतरतटीपथा ललति लेखलोकापगा ॥ ४१ ॥

उषर्बुधभृताहितत्रिणयनोरुवीर्योद्भव-
त्कुमारशुभमातृतोपगमभूरिसम्भाविता ।
द्विषन्तपपराक्रमार्यममहात्मदेवव्रत-
प्रसूर्विजयतेतरामपि सुपर्वणां देवता ॥ ४२ ॥

महाप्रलयवारिधिव्यतिकरक्रमाभ्रङ्कष-
प्रवाहविपरिभ्रमद्रविविधुग्रहोडुव्रजा ।
निमज्जननिरुच्छ्वसद्दिगिभदुश्श्रवाक्रन्दना
तरङ्गपरिवर्तितामरसनाथसङ्क्रन्दना ॥ ४३ ॥

( कुलकम् )

प्रतिस्मरभिदद्रिवीच्यसकृदात्मनागश्रम-
प्रताम्यदसुलालसत्रिदशपत्यनर्थोद्यमा ।
समुत्प्लवनसाधनस्तनसुवर्णकुम्भाप्सरो-
मुखाब्जकचशैवलश्लथितपुष्पमुक्ताकुला ॥ ४४ ॥

तरङ्गगळितांशुकोत्प्लुतसुपर्ववाराङ्गना-
नितम्बपुळिनव्रजत्सुरविरोधिनेत्राण्डजा ।
निपातितसुरद्रुमद्रुतविनष्टचिन्तामणि-
प्रमुष्टसुरकामधुक्प्रसृमरोर्मिभीतिप्रदा ॥ ४५ ॥

युगान्तमरुदुच्छ्रितोर्म्युदरलीनमेघङ्कर-
द्युपुष्पवदुदीतभीकरमहान्धकारावृता ।
अजस्रपरिवर्धितत्रिदशभूरिहाहारव-
प्रकारमुखरीकृताखिलहरिज्झरापूरिता ॥ ४६ ॥

विलुम्पितनिलिम्पभूः सुरसरिद्वरेत्थं क्रुधा
वहन्त्यपि धरातलावतरणप्रसङ्गोद्भुवा ।
प्रतिक्षणविजृम्भिताप्रतिहतावलेपोद्धता
तृणाग्रहिमबिन्दुतां गिरिशमूर्धनि प्रापिता ॥ ४७ ॥

कठोरतपसा ततो त्रिधुवतंसमाराधयन्
भगीरथनृपश्चिरादशिथिलप्रयत्नः स्वयम् ।
अवाप विबुधापगां धरणिमानिनीषुर्व्रती
समुद्यमसुरद्रुमः फलति हि क्षमां बिभ्रताम् ॥ ४८ ॥

भगीरथमनुव्रजन्त्यधिपथश्च जह्नोः कुटी-
मनीनशदृषिर्द्रुतं परमकोपनस्तां पपौ ।
ततः स्तुतिशतैः कृतैश्चिरतरं, प्रसन्नः पुन-
र्जहौ श्रवणतस्ततः प्रभृति जह्नुकन्या स्मृता ॥ ४९ ॥

विधाय महता परिश्रमभरेण मर्त्यापगां
स्वमातुलगरुत्मदुक्त्यनुसृतौ भृशं श्रद्दधत् ।
नृपः स सगरात्मजान्कपिलकोपदावानल-
प्रपातशलभायिताञ्शुभजलैरतार्प्सीत्पितॄन् ॥ ५० ॥

अजस्रममरावतीविहरणैकबद्धस्पृहा-
प्यधिक्षिति जनुष्मतां कलयितुं महानुग्रहम् ।
समुन्नतहिमावनीधरवरादमर्त्यात्मनः
प्रसूः प्रभवति स्वयं सकलभाग्यसन्दायिनी ॥ ५१ ॥

हरामनिशमंहसां हरशिरस्तटीलालसां
जगत्त्रितयशर्मदां जनिमृतिप्रणाशप्रदाम् ।
समस्तसरिदीश्वरां समवने सदा भास्वरां
श्रयध्वमवनिङ्गतां जनिभृतो! ऽद्य जह्नोस्सुताम् ॥ ९२ ॥

समस्तसुरमन्दिरप्रवरराजवाराणसी-
विहाररसिकाग्रणीः स्फुरति विश्वनाथोऽनया ।
इयञ्च परिभूष्यते भगवतैव तेनानघा
मणीकनकसङ्गतिर्जगति कस्य न स्यात्प्रिया ॥ ९३ ॥

कळिन्दगिरिकन्यका सरसनीरगोदावरी
विधुप्रियसुतानघा भगवती सरस्वत्यपि ।
कवेरतनुजा मनोहरजला च सिन्धुर्धुनी
वहन्ति षडिमाः क्षितौ सुरसरित्सुसख्यः शुभाः ॥ ९४ ॥

निशाचरकुलानलप्रलयकालमेघात्मना
श्रियः पतिरवातरन्निगमधर्मरक्षापरः ।
स यत्र, परिपावयन्त्यघिसु, तामयोध्यापुरीं
सरिच्च सरयूः स्वयं द्युसरितैव सङ्गच्छते ॥ ९५ ॥

स्ववेणुनिनदैर्हरन्नमरशाखिमूले गवां
    व्रजं व्रजपुरन्ध्रिभिश्चिरमरंस्त नन्दात्मजः ।
यदीयतटमावसन्विशदकौमुदीबन्धुरं
    सुताऽहिमरुचेश्च सा व्यतिकरोति गङ्गांभसि ॥ ५६ ॥

अभङ्गुरतरङ्गया महिमभिभृशं तुङ्गया
    कृपालसदपाङ्गया हरिपदाम्बुजासङ्गया ।
वितीर्णभवभङ्गया श्रितवतां, तया गङ्गया
    मिळत्यमितकौतुकात् क्वचन धातृपुत्रा नदी ॥ ५७ ॥

स्रवन्त्यधिधरान्तरं शुभपयाः सरस्वत्यपि
    प्रसिद्धनिजवैभवा जगति, सम्भिनत्ति स्वयम् ।
झरैरमरदीर्घिकायमुनयोश्च यत्रोच्छ्रितैः
    प्रयागमवनौ हि तं सकलतीर्थराजं विदुः ॥ ५८ ॥

अनेकमुखमम्ब ! ते निगमनश्च यादःपतौ
    व्यनक्ति तदिह स्फुटं शतमखादिदेवेडिते ।
गुरोरपि समुद्धतप्रकृतिकस्य यादृक्फलं
    सतां खलु विचेष्टितान्न्युपदिशन्ति नीतीर्ध्रुवाः ॥ ५९ ॥

सतां हृदिव निर्मलं वृजिनतूलकालानलं
रघूत्तमसमर्चितं निगमसंहतिश्लाघितम् ।
पुरातनयशोन्वितं पुरभिदुत्तमाङ्गश्रितं
भजध्वममरापगोदकममन्दमानोज्ञकम् ॥ ६० ॥

नमोऽस्तु जगदम्बिके ! भगवति ! स्तुता भक्तितः
पुनीहि कृपयार्भकं तव पदाब्जभृङ्गं द्विजम् ।
श्रियं वितर मेऽमितामव ममात्मजान्सादरं
भुवि त्रिपथगागता सुभगता विजेजीयताम् ॥ ६१ ॥

गाग

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
त्रिपथगासौभाग्यन्नाम पञ्चमो विलासः ।

श्रीः

# प्रकृतिविलासकाव्ये

## द्विजराजसाम्राज्यं नाम

## षष्ठो विलासः

कलयतु कुशलं नः कालकालावतंसः
कुवलयदळनेत्रानन्दसन्दानशीलः ।
सुमशरसुहृदिन्दुः सूर्यवत्कालमाता
भुवनहृदयहारी व्योम्नि रात्रौ विहारी ॥ १ ॥

चरितुमिदमसीम व्योम ते सोम ! सिद्धं
श्रितमधिकमनोज्ञैः किङ्करैः ऋक्षवर्गैः ।
तव सह मृगदृग्भिः सन्निधत्ते च रोहि-
ण्यतिशयितुमलं त्वां भाग्यवन्तं न कोऽपि ॥ २ ॥

तुहिनरुगजनिष्ठाश्वेतसस्त्वं विराजः
स्फुरसि रविरिव श्रीवासुदेवस्य नेत्रम् ।
अविरतमपि मूर्ध्ना लाल्यसे शूलिना, त्वां
निरुपममहिमानं स्तोतुमीशः कथं स्याम् ॥ ३ ॥

प्रकृतिशिशिरमूर्तिर्दृष्टमात्रः क्षणेन
 व्यपनयसि समस्तं तापमिन्दो! मयूखैः।
परिहरसि सुदूरं शार्वरश्चान्धकारं
 किमपि हृदि विधत्से कौतुकं नः समेषाम् ॥ ४ ॥

फलमनुपममिन्दो! नेत्रभाजां विराज-
 स्यधिवहसि विशङ्कं व्योम्नि सम्राट्पदं त्वम्।
अपि लसति समन्तादृक्षसङ्घेऽतिसङ्ख्ये
 श्रयति रमणमेव त्वां हि सौभाग्यलक्ष्मीः ॥ ५ ॥

अमृतकर! गिरां त्वं वर्तमानः सुदूरं
 मधुरिमनिधिदेवः प्रेमपात्रं प्रजानाम्।
भुवि कतिपयशब्दैर्वर्ण्यमानः कथं स्याः
 प्रकृतिगुणकथायां क्लेशभाजां कवीनाम् ॥ ६ ॥

स्फुरसि निशि शशाङ्कः शङ्खवत्त्वं नभोऽब्धौ
 विहरसि च विहायःपल्वले मल्लिकाक्षः।
गगननलिनपत्रे भासि दुग्धान्नराशि-
 र्लससि मधुरहासो व्योम्नि तन्व्याः प्रकृत्याः ॥ ७ ॥

अमृतकिरणजालैर्लोचनासेचनोत्कै-
श्चिरतरमवगाढं सान्द्रमानन्दकन्दम् ।
सहृदयहृदयेऽब्ज ! स्वैरमङ्कूरयन्द्रा-
गुदयशिखरिशृङ्गं तुङ्गमारोहसि त्वम् ॥ ८ ॥

अहिमकरमयूखालोक एवाश्रितस्त्वां
हिमकरमनवद्यं हृद्यमत्यन्तशीतः ।
परिमृशति वितन्वन्सौख्यमङ्गानि भूयः
प्रकृतिरपि विपर्येत्याश्रयस्य प्रभेदात् ॥ ९ ॥

गगनसुममसिद्धं सङ्गिरन्तां विमूढा
वियदतुलसरस्यां श्वेतमब्जं सुजातम् ।
प्रकृतिवरपुरन्ध्यास्सर्वसौन्दर्यसारं
रसिकमधुपगर्भं मूर्तमाचक्ष्महे त्वाम् ॥ १० ॥

अपथि चरितुकामान्द्वीपिकल्पान्खलौघा-
न्सुजनहृदयतापे सन्ततं श्रद्दधानान् ।
रजनिकर ! धरण्यां लोकमान्यांश्च साधू-
नवसि सममरम्यं तारतम्यं निरस्यन् ॥ ११ ॥

अहमिह नु पिबेयं त्वां विनिष्पीड्य चन्द्र !
    द्रुतमिति मतिमेति प्रेमतो मर्त्यलोकः ।
दिवसकृति तु नैवं, तत्र किं स्यान्निदानं
    हृदयहरणदक्षात्स्निग्ध ! लालित्यतोऽन्यत् ॥ १२ ॥

अमृतकर ! मनोज्ञं दर्शनं तावकं नः
    स्थगयति मुदितानां मर्त्यतां जन्मसिद्धाम् ।
अविभरुरमरत्वं त्वामभीक्ष्णं निगीर्य
    त्रिदिवमधिवसन्तो, नैव चित्रं ह्यमुत्र ॥ १३ ॥

वहसि समधिकं त्वं साह्यमिन्दीवरिण्या
    रमण ! सुमशरस्य स्वान्तजत्वाविशेषात् ।
स कथमितरथोच्चैस्साधयेदात्मलाभं
    स्वयमभिनिविशन्ते मित्रकृत्यं हि सर्वे ॥ १४ ॥

निरवधिकदयाब्धे रक्षितुञ्जीवलोकान्
    शशधर ! परिपुष्णास्योषधी रश्मिजालैः ।
भुवि न कतिपये सञ्जानते ते महिम्ना
    भवति यदकृतज्ञा दोषमारोपयन्ति ॥ १५ ॥

मधुरिमपरिपोषाधायकं नीलिमानं
प्रकृतिविहितमेतं तावकं श्रीसमेतम् ।
अभिदधति कळङ्कं युक्तिमुत्सृज्य केचि-
त्किमिव न विवदेरन्कुन्तळेऽपि स्त्रियस्ते ॥ १६ ॥

शमयसि सुमनोभ्यस्सादरं स्वं शरीरं
स्वसुखविमुख एष त्वं वितीर्याशनायाम् ।
दिवि भुवि न हि कोऽपि त्वादृगास्ते वदान्यो
गुणनिधिमपि लोको वक्ति दोषाकरं त्वाम् ॥ १७ ॥

भुवि गतमनुगच्छन्नेष लोकः स्वभावा-
त्प्रलपतु च यथेच्छं चन्द्र ! मा गा विषादम् ।
गुणगणपरिपूर्णं शङ्करस्त्वां स्वमूर्ध्ना
वहति सततमेतच्छ्रेयसे भूयसेऽलम् ॥ १८ ॥

रघुपरिवृढदारानप्यहो ! दोषभाजः
कतिचिदचकथंश्चेन्निर्विशङ्कं स्वदर्पात् ।
मृदुतरहृदमीषां त्वं कियान्दुर्जनानां
कथमपि न हि जह्युर्दुर्हृदोऽब्ज ! स्वभावम् ॥ १९ ॥

कतिपयशठमिथ्यापोदितात्यन्ततप्तं
हृदयममृतमूर्तेः प्रापदिङ्गालतां द्राक् ।
भवति च न कलङ्को वस्तुतश्शीतभानो !
कविरहमभिदध्यां, जानतां संशयानाः ॥ २० ॥

रजनिरमणलक्ष्म प्रेक्ष्य संशेरते ये
स्वयमिह बहुधा, ते जानते नैव तत्वम् ।
प्रतिफलति सशैलं गोलमुर्व्या विधावि-
त्यभिदधति हि तत्वज्ञानिनो निर्विकल्पम् ॥ २१ ॥

विशदजलदखण्डान्मन्दमन्दं विलङ्घ्य
स्फुरसि गगनभोगे चन्द्र ! गच्छन्सलीलम् ।
तदिदमनुकरोति स्वर्णदीवीचिपुञ्जो-
द्व्रजनममितदर्पाद्राजहंसस्य रम्यम् ॥ २२ ॥

मलिनजलमुचस्त्वामावरीतुं यतेरन्
श्रुतिपुटकटुशब्दैरस्थिरद्योतभाजः ।
विजयिन इव कामं डम्बरञ्चापि कुर्यु-
स्त्यज हृदि भयमेभ्यो वस्तुतोऽधस्तनेभ्यः ॥ २३ ॥

प्रियरमण ! हि रोहिण्यादिवामेक्षणानां
विलसति भवतेन्दो ! हन्त ! राजन्वदेतत् ।
उडुसमुदयरम्यं व्योम राज्यं सुराज्ञा
प्रकृतिविहितमुच्चैर्बिभ्रता स्वाधिकारम् ॥ २४ ॥

कलयति खलु लेखैः कल्प्यमानः कलानां
मुदमधिकदयां ते व्यञ्जयन्सङ्क्षयोऽपि ।
त्वमिव वद वदान्यः कोऽर्पयेदात्मदेहं
प्रतिदिनमितरार्थे निर्विशङ्कं शशाङ्क ॥ २५ ॥

वितरसि फलमक्ष्णां श्लक्ष्णमूर्तिः समेषा-
मधिचिकुरभरं प्राग्दिक्पुरन्ध्र्याः स्फुरंस्त्वम् ।
भ्रमरनिकरगर्भोन्निद्रमल्लिप्रसून-
प्रकर इव समग्राकल्परूपः प्रकामम् ॥ २६ ॥

तिमिरमपि च कृत्स्नं ज्योत्स्नयोत्सारयन्तं
सह निशि मलिनिम्ना हृद्गतेनाखिलानाम् ।
निदधतमुरुलक्ष्मीं स्त्रीदृगिन्दीवराल्यां
कतिचन बत ! नेत्रैस्त्वामपीत्वा स्वपन्ति ॥ २७ ॥

उदधिमथनकाले श्रीमुखा रम्यभावाः
सहभुवमपि हित्वाऽयासिषुः कालकूटम् ।
त्वमपि शिवमवापस्तद्वियोगासहिष्णुः
सहजमजहदब्ज ! क्रूरमुर्व्यामपूर्वः ॥ २८ ॥

तरणिकिरणजौष्ण्यात्पङ्कजान्युज्जिहाना
समभजदसिताब्जान्यब्धिजाता न वेति ।
शिशिरतरकरैः श्रीसोदर ! द्रष्टुकामो
विदळयसि समन्तात्किंस्विदिन्दीवराणि ॥ २९ ॥

समजनिषत भावा ये च जैवातृकाद्वयः
श्रियमपरदुरापां त्वादृशास्ते श्रयन्तः ।
विदधति मधुरिम्णाऽकृत्रिमेण प्रमोदं
सहृदयहृदयानि स्वैरमासाद्य सद्यः ॥ ३० ॥

प्रशमयसि पिपासां त्वं चकोराङ्गनानां
परिहरसि च मौनं सादरं कैरविण्याः ।
किरसि दिशि करैः श्रीचन्द्र ! सान्द्रामृतानि
स्फुरसि रसमुदारं वर्धयन्सर्वयूनाम् ॥ ३१ ॥

अहनि तपतु कामं हन्तु भूयोऽन्धकारं
दळयतु नळिनानि भ्राजतां लोकचक्षुः ।
कथमयमयमानोऽप्यर्यमा व्योमसीम-
न्यधिवहतु कलानामीश ! लालित्यलेशम् ॥ ३२ ॥

अपि हृदयहरेणानेन सौभाग्यभूम्ना
हिमकर ! परिहर्तुं नेशिषे कोकशोकम् ।
त्वयि सति समभावे वस्तुतो नैव दोषो
विधिरपि न विदग्धः प्रीणने यत्समेषाम् ॥ ३३ ॥

सदयमुदयमानं यामिनीशाद्रिशृङ्गे
प्रकृतियुवतिरेषा तोषतः पुष्पवर्षैः ।
नयनसुभगमर्चत्यम्बरे त्वां, विशीर्णा-
न्यह ! दधति समन्तादृक्षसंज्ञां सुमानि ॥ ३४ ॥

अभिभवति हि भानुः स्वेतरेषां प्रकाशं
श्रुतिततिमहितोऽपि स्वैरमीर्ष्याभरेण ।
अनुमतिमपि दत्से तारकाभ्योऽपि भातुं
गदति जगदशेषं हन्त ! दोषाकरं त्वाम् ॥ ३५ ॥

यमिह समुदितेर्ष्यो लोक एष प्रणिन्दे-
 स्स च गुणगणपूर्णो व्याप्तिरेषेति विद्धि ।
निगमशिखरमृग्यं त्वद्धृतंसञ्च गौर्या
 रमणमपि कियन्तः स्वैरमुन्मत्तमाहुः ॥ ३६ ॥

मृदुलतरलमुग्धस्निग्धवर्ष्माणमेनं
 ग्रसितुमसकृदिन्दो ! सैंहिकेयो भवन्तम् ।
गतभयमभिधावत्युष्णरश्मौ तु नैवं
 सरळगुणनिकायो मूर्खधिक्कारहेतुः ॥ ३७ ॥

कतिचन दधमानाः शिष्यमाणाः कलास्ते
 श्रियमपि भवितव्यं लोपमासेदुषीणाम् ।
प्रतिरजनि कलानां कृष्णपक्षे स्फुरन्त्यः
 कमपि हि परिपोषं शीतपूषन् ! ददन्ते ॥ ३८ ॥

द्युतिमपि ददता स्वां भानुना त्वं कृतज्ञो
 भजसि शुभमजर्यं पूज्यपादेन दर्शो ।
निशि भृशमुडवोऽमी डम्बरं कुर्वते, य-
 त्सरसविहृतिहेतुः स्वामिनोऽसन्निधानम् ॥ ३९ ॥

---

(अत्राजर्यमित्यस्य सङ्गतमितिविशेष्यमध्याहार्यम्)

प्रतिसुभगपदार्थं व्यञ्जयन्ती परेशं
प्रकृतिरकृतकश्रीमत्स्वरूपेण लीनम् ।
जयति मधुरशुभ्रच्छत्रमुद्दीप्तमुक्तं
हिमकरमवलम्ब्य त्वां स्वराज्यं वहन्ती ॥ ४० ॥

नवरजतशलाकाश्रीमुषस्ते मयूखा
मनसि निविशमाना नेत्रमार्गेण चन्द्र ! ।
चिरतरपरिलीनानन्धकारं निरस्य
द्रुतमभिनवभावाँल्लीलयोल्लासयन्ति ॥ ४१ ॥

मघवमणिकटाहश्रीहरे ह्यम्बरे प्रा-
ग्दिशि समुदितसन्ध्यारागपूर्णं तवेदम् ।
परिणतमिव पुण्यं पूर्वसिन्धोरुदीतं
शरदि कुमुदिनीशोदारमाभाति बिम्बम् ॥ ४२ ॥

सरसतरपटीरोर्वीधरोरोजरम्या-
मुरुगिरिसरिदूर्मीहीरहारैः स्फुरन्तीम् ।
कुवलयदृशमुद्यन्मन्दहासां प्रसूनैः
कलयसि सदुकूलां ज्योत्स्नयारण्यलक्ष्मीम् ॥ ४३ ॥

महति च सुरवर्त्मन्याधिपत्यं दधानं
    प्रियतनयमुदन्वान्यामिनीनायक ! त्वाम् ।
मुदितहृदनुपश्यन्नूर्मिभिर्वर्धतेऽसौ
    न हि सुखमिह पुत्रश्रेयसोऽन्यत्पितॄणाम् ॥ ४४ ॥

क्वचन विपिनसीमन्यावृणानैः परीतां
    धरणिरुहवरेण्यैर्लालसां दर्शने ते ।
प्रियकुवलयिनीमालिङ्ग्य पर्णान्तरेण
    प्रसभममृतहस्तैर्ह्लादयस्याविशङ्किः ॥ ४५ ॥

अविरळतरुगुल्मश्यामळोपत्यकप्रा-
    क्शिखरिशिखरमाप्त्वोद्दृश्य भान्तं भवन्तम् ।
सपदि हृदि निदध्मो ह्यर्धमुग्धेन्दुमौळिं
    करिपरिवृढकृत्तिं शीतरश्मे ! वसानम् ॥ ४६ ॥

खल इव मलिनात्मा भावतत्त्वापलापे
    कृतमतिरसमर्थः स्थातुमग्रेऽन्धकारः ।
तव समधिकसत्त्वोद्रिक्तवृत्तेः सुराज्ञ-
    श्चलहृदचलरन्ध्रान्वेषणाय प्रयाति ॥ ४७ ॥

तिमिरमपि महीभृद्गह्वराभ्यन्तरस्थं
वनभुवि च निलीनं सान्द्रमुर्वीरुहेषु ।
जयति सकलमिन्दो ! चन्द्रिकासारमिश्रं
प्रकृतिरसिकचेतःप्रीतये त्यक्तवैरम् ॥ ४८ ॥

पुलिनपृथुनितम्बां प्रान्तभूभृत्स्तनाढ्यां
जलधररुचिवीचीकुन्तळां फेनपुष्पाम् ।
सहजशुचितनुं ग्लौश्चन्द्रिकागौरवस्त्रां
ददददधिसुवेलाकेरळस्त्रीं हि भुङ्क्ते ॥ ४९ ॥

धवलयसि सुधांशो ! नीलकल्लोलमाला-
कबलितपुलिनालीमञ्जुलामब्धिवेलाम् ।
मदकरिवरमूर्धस्पर्ध्युरोभूनितम्ब-
स्फुरदुरुरुदृग्भिः सादरं पीयमानः ॥ ५० ॥

चलदळदळचेताः प्रायशः स्त्रीसमूहो
युवजनसुखसाध्यो देशकालानुकूल्यात् ।
प्रकृतिचतुरवृत्तो ह्रीसमुन्नेयकाम-
स्तव भवति हि वश्योऽवश्यमिन्दो ! कलाभिः ॥ ५१ ॥

स्वयमचकमत त्वद्रूपधेयाब्धिमग्ना
कुसुमशरभृशार्ता श्रीसुराचार्यभार्या ।
असकृदपि च गर्भे बिभ्रती भर्तृभीत्या
समयविदनिशं त्वामन्वभूदग्निसुभ्रूः ॥ ५२ ॥

त्वममरगुरुदारांश्चन्द्र ! निर्बन्धितोऽगा
जगदिदमविभाव्य प्राह ताराञ्च साध्वीम् ।
शिरसि दधदुमेशः श्लाघते त्वां विगीतं
वयमिह तु विमूढा वेद को धर्मसूक्ष्मम् ॥ ५३ ॥

इयदहमभिदध्यां भूसुरस्तेऽद्य राज-
स्त्वमतुलकुलनारीः स्वैरमाविल्यकार्षीः ।
यदनुभवसि नित्यं राजयक्ष्माणमुग्रं
चरितुमपथि रागो दीर्घमायुर्विहन्यात् ॥ ५४ ॥

महिमनि हिमधामन्स्निग्ध ! ते सन्दिहे न
स्खलनमसकृदित्थं चिन्तयंस्ते प्रदूये ।
अपि पशुपतिमाप्त्वा चेत् स्वभावं न जह्या-
स्त्वदपि बहुमतो नः सर्वथा कालकूटः ॥ ५५ ॥

उपवनमतिसान्द्रोन्निद्रहृद्यप्रसून-
प्रसृमरमकरन्दस्वादमाद्यद्द्विरेफम् ।
परित उदितहर्षोन्मेषकादम्बयोषा-
ध्युषितकुवलयिन्यश्चन्द्र ! चेतो हरन्ति ॥ ५६ ॥

परिमळभरमुग्रं सङ्किरन्नौहिणानां
शिशिरतरसमीरो मन्थरोऽयं प्रवाति ।
शिखरिशिखरतुङ्गज्योत्स्निकारम्यहर्म्यो-
ल्लसदतुलनितम्बिन्यङ्गसङ्गैकलोलः ॥ ५७ ॥

नगरवरपुरन्ध्र्यः कृत्रिमश्रीसमृद्धा
विधुकरपरिशुभ्राद् द्रागकूपारपारात् ।
नयनमधुरमाराक्षुद्रलीलाद्रिशृङ्गं
किमु मुखकमलैस्त्वां चन्द्र ! जेतुं श्रयन्ते ॥ ५८ ॥

मधुमलयमरुद्भ्यां दीपयन्कामवह्निं
विरहिजनमनांसि द्रावयन्निर्दयस्त्वम् ।
हिमकर ! मकराक्षीवर्गगर्ह्योऽस्यभीक्ष्णं
प्रियसुहृदबलाश्रूण्यत्र शस्त्राण्यवेहि ॥ ५९ ॥

श्रुतिततिमयगात्रब्रह्मवद्वर्धमान-

स्त्वमसमशरसाराम्नायशृङ्गप्रदीपः ।

द्विजसमुदयराज ! स्निग्ध ! साम्राज्यमाप्त्वा

भज शमनिशमिन्दो ! शङ्करस्य प्रसादात् ॥ ६० ॥

अनभिमतवचोभिस्ते ह्यपाराध्यमेभि-

र्धरणिदिविषदं मां मित्र ! चन्द्र ! क्षमस्व ।

सहृदयहृदयाब्जद्योमणिर्ग्रन्थ एष

स्फुरतु जगति यावत्कल्पमाकल्प ! शम्भोः ॥ ६१ ॥

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
द्विजराजसाम्राज्यं नाम षष्ठो विलासः ।

श्री:

# प्रकृतिविलासकाव्ये

## प्रभाकरप्रभावो नाम

## सप्तमो विलासः ॥

---

श्रेयो वो दिशतात् त्रयीतनुरयं ब्रह्मेत्युपास्यः सतां
जन्मस्थेमलयान् प्रकृत्यनुगमात्तन्वन्ननादिर्विभुः ।
चक्षुः श्रीपुरुषोत्तमस्य निगमैर्वेद्यस्य विश्वात्मनो
बाह्याभ्यन्तरदुस्स्थितान्धतमसध्वंसाय बद्धोद्यमः ॥ १ ॥

आम्नायांश्चतुरो ब्रुवन्त्यचतुरान्प्राज्ञाः स्तवे तेऽर्यमन् !
मन्दात्मामिदधीय वा कथमहं दूरे भवन्तं गिराम् ।
आयस्यामि भृशं न केवलमहं वाणीमपि क्लेशया-
म्येतत्साहसकृत्यमत्र कृपया क्षन्तव्यमभ्यर्थये ॥ २ ॥

विद्वांसः प्रथमे मयूरसदृशा भक्त्यार्यगृह्याः स्वयं
सूर्यं धार्यमहर्दिवं हृदि सतां श्लोकैरनेकैर्जगुः ।
किं दुष्येम नु तावता कतिपयैः पद्यैः स्तुवन्तः प्रभुं
शिल्पज्ञेषु नरेषु सत्सु मधुपा बध्नन्ति किं नो गृहान् ॥ ३ ॥

प्रातः शीतगभस्तिरस्तशिखरिण्युष्णीषवल्लम्बते
बिम्बं बिभ्रदशुभ्रवस्त्रशकलश्रीकं प्रभादुर्विधः ।
रुग्भिः कृष्णमृगस्य पाण्डरपृषन्त्यृक्षाण्यधः कुर्वते
भात्यभ्रं विरताभिनायकमहारङ्गाङ्गणश्रीधरम् ॥ ४ ॥

वातो वाति समन्ततोऽपि रसितैः शीतः प्रभातोद्गतः
श्रोत्रप्रीतिकरं विरौति कुतुकाज्जाग्रत्पतत्रिव्रजः ।
आकाशः परिपेशलः शरखुमश्रीहारिभिर्वारिदैः
स्वान्तं हन्त ! विकासयन्ति परितः शान्ता दिगन्ता भृशम् ॥

सौन्दर्यं प्रतिभावमुद्गलदिव न्यस्तं प्रकृत्यादरा-
दुग्रस्त्वा सन्तमसासुरं विदधतं शून्यं जगन्निर्दयम् ।
संहत्याभ्रतलं तदीयरुधिरक्षोदाक्तमातन्वती
सन्ध्या सैरिभमर्दिनीव भगवत्याराध्यमानैधते ॥ ६ ॥

विष्वद्र्यक्षयरुणत्तमांस्यतितमां सूतोऽरुणस्यारुणः
शुद्धां कर्तुमना विकर्तनविहृत्यर्हंतमां पद्धतिम् ।
नैरन्तर्यश्च समीरणेन परितः शीर्णा हिमानी जहौ
जीमूताः शनकैः प्रधावितुमुपक्रान्ता विभीता इव ॥ ७ ॥

प्राचीमात्मविलोकनैकरसिकां रोचिर्भिरङ्कूरय-
न्बन्धूकस्तबकप्रभापरिभवाहम्भावसम्भावितैः ।
बिम्बं बिम्बफलोज्ज्वलञ्च परितः सद्रत्नकाण्डायितै-
रुल्लासं कमलाकरस्य कलयन्नुद्यन् रविः खेलति ॥ ८ ॥

पूर्वाम्भोनिधिगर्भतः किमुदभूत्प्रद्योतनो भानुभिः
कुर्वन्विद्रुमताम्रमभ्रमसितं पाथश्च सारस्वतम् ।
सर्वेषां धियमित्थमादधदयं मन्दोद्गतैरञ्चितै-
रारोहन्निव लीलयोदयगिरेः शृङ्गं समालोक्यते ॥ ९ ॥

इन्धानं महिमैकधामभिरहर्नाथं स्वयं धामभिः
प्रत्यग्रोद्धृतदिग्धकुङ्कुमरजःपङ्काकुलाङ्गोज्ज्वलाम् ।
प्राचीं चन्दनचर्चिताचलकुचप्राग्भारनम्रां करैः
प्रेम्णा द्राक्परिरभ्य भान्तममितं भक्त्या भजामोऽन्वहम् ॥

सिन्दूरारुणगन्धसिन्धुरसमुत्तुङ्गोत्तमाङ्गोपरि-
स्वैरास्कन्दनपाकमर्दनमधःकुर्वन्निवाहर्मुखे ।
पूर्वोर्वीधरतुङ्गशृङ्गमधिकैः संरञ्जितं धातुभी
रक्तोऽत्यन्तमनन्तवर्त्मनि विभात्याक्रम्य तिग्मद्युतिः ॥११॥

राजीवव्रजजीवनौषधमुपस्योजायमानं जवा-
दुद्गच्छन्तमनच्छतां श्रितवतां छयन्तं कुसुम्भच्छविम् ।
सुत्राम्णो दिशि चार्णवोऽरुणममुं नीलैरुदीर्णैः करै-
र्बिभ्रद्भिः किमु फेनपुञ्जकुसुमस्रग्भारमभ्यर्चति ॥ १२ ॥

पूष्णः पुष्करभूषणस्य घृणया पूर्णा घृणिश्रेणयो
मुष्णन्तो घुसृणारुणश्रियमुषस्यग्रे विवर्धिष्णवः ।
अग्रण्यस्तमसां निबर्हणविधावर्णोजसम्प्रीणने
प्रावीण्यं दधते तथा वितरणे श्रीणामुदीर्णा नृणाम् ॥

अस्तोकं भविकं क्रियासुरधिकश्रीकास्तमो घातुकाः
कोकीशोकनिवर्तकाः कमलिनीसम्पर्कसौख्योत्सुकाः ।
लोकानां परिपालकाः क्रमणतः कालस्य निर्वाहका
आर्काः पातकपावका हृदि ममालोकाश्चिरं नर्तकाः ॥

मार्तण्डं जगदण्डनायकमसद्दण्डं धरन्तं भृशं
चण्डैर्भानुभिरभ्रमण्डलमुदस्याहिण्डमानं क्रुधा ।
सारस्यादुरुपुण्डरीकमुकुलानाखण्डयन्तं करै-
र्नौमि व्योमतलैकमण्डनमहं त्रय्यात्मना पिण्डितम् ॥ १९ ॥

19529.

मञ्जूद्गुञ्जदळिव्रजैश्चटुलवागालापिनीं पद्मिनीं
श्रीकादम्बनितम्बिनीकलरवैः शिञ्जानमञ्जीरिणीम् ।
नीलैः कुन्तळिनीश्च शैवलचयैः फुल्लाम्बुजैः पुष्पिणीं
श्यामां श्यामळशाद्वलेन परितः श्लिष्यत्ययं द्योमणिः ॥

अर्चां पुष्पमचर्चिकाभिरुचितां सङ्गच्छमानं दिवा
चञ्चन्मेचकवारिवाहचिकुरोदञ्चद्रुचाऽनीचया ।
मित्रं कञ्चुकितद्रुमाचलकुचा व्याकोचिनीभिश्चर-
न्त्युद्दृश्याच्छहृदश्च दाडिमसुमच्छायं वनीदेवता ॥ १७ ॥

किं लेखर्षभनीलरत्नफलके खे दीप्रचक्रं हरेः
खद्योताख्यमिहाखिलान्भुवि खिलीकर्तुं खलान्खेलति ।
किं वा प्रेङ्खति वेदशेखरखनेरुत्खातमेकं परं
ब्रह्माखर्वपराक्रमः खररुचिस्सोयं खगेशद्युतिः ॥ १८ ॥

भव्यं भूरि गभस्तयोऽभ्रममितो भ्राजिष्णवो भावय-
न्त्वसभ्यं, परिभाव्य भाविततरा भानोर्भवं भीकरम् ।
भित्त्वाभ्यन्तरमोहमद्भुततमं भानं स्वरूपाश्रियं
भक्तानामिह भासयन्तु भुवि नः प्रागल्भ्यमाबिभ्रतः ॥

19529

ज्योतिष्माञ्जयतादजादिविबुधैः पूज्योऽब्जबन्धुर्जना-
न्रक्षञ्ज्यामधिजग्मुषो विरजसः कुर्वन्नजस्रञ्च नः ।
राजीभिः परिरञ्जयन्निजरुचां काष्ठाञ्च जम्भद्विषो
निर्व्याजेन जनुष्मतामिह रुजामाभञ्जयन्नञ्जसा ॥ २० ॥

अश्वैः सप्तभिरन्वितेन हरता शक्तिं दृशां द्योसदा-
मेकः सञ्चरसे रथेन गगनाभोगे च निस्सीमनि ।
प्रत्यावासमुखं सुपर्वमृगदृग्घस्ताब्जनीराजितः
प्रस्थानावसरेऽर्क ! किन्नरसमुद्गीतापदानोऽन्वहम् ॥ २१ ॥

शक्र ! द्राग्विजहीहि वर्त्म, पुरतोऽपक्राम वह्ने ! मना-
क्तूर्णं सन्नम रे यम ! स्वपितरं, किञ्चेष्टसे नैर्ऋत ! ।
पाशिन् ! जागृहि, मा रुतं कुरु मरुन्मा माद्य यक्षाधिपे-
त्युच्चैर्भास्कर ! पारिपार्श्वकगणा गर्जन्ति ते प्रस्थितौ ॥

जन्मादीन्विदधासि सर्वजगतामादित्य ! कालात्मना
श्रुत्यन्तैः प्रतिपाद्यसे समुदितैस्तात्पर्यतः सर्वथा ।
प्रत्यक्षं स्फुरसीह दैवतमथाप्यन्यानुपास्ते जनो
हन्त ! प्रत्यहमेष ते परिचयोऽवज्ञास्पदं किं नृणाम् ॥

पद्मां पद्मकदम्बगर्भविहृतावौत्सुक्यमाबिभ्रतीं
भित्त्वा पद्मदळानि दर्शयसि हि श्रीपद्मबन्धो ! करैः ।
जाग्रत्कोकनदाभमण्डललसच्छ्रीपद्मनाभात्मने
भक्त्युन्मेषवशात्सुवर्णवपुषे पुंसे परस्मै प्रभो ॥ २४ ॥

किं प्राग्दिङ्मृगदृक्स्फुरत्कचभरालङ्कारहीरव्रजः
किं वा त्वं प्रकृतेर्विलासमुकुरो देव्याः परेशार्पितः ।
सत्वानामुत किं महान्समुदयो मूर्तो गुणानां भवा-
न्कारुण्यान्मम संशयं व्यपनयाम्नायैकगम्योऽर्यमन् ॥

ज्योतिर्वार्धिमजस्रदुश्श्रवरवज्वालोर्मिमालाकुलं
भ्राम्यद्भूरिभयङ्करक्रममरुत्संवर्धितावर्तकम् ।
धूमस्तोमपरीतमुष्णकिरण ! त्वां द्योतमानं दिवि
स्वान्तस्येव भुवोऽपि दूरमपरिच्छेद्यं महान्तो विदुः ॥

कालात्पूर्वमसङ्ख्यकाद्दिनमणे ! कस्याप्युपाधेर्वशा-
त्खण्डो मण्डलतस्तवाणुरभवद्यः शीर्णतां प्रापितः ।
सैवाजन्यवनिर्वनीगिरिसरित्पत्यादियुक्ता क्रमा-
दित्येवं हि खगोळशास्त्ररसिकाः सर्वे विनिश्चिन्वते ॥

भास्वन्भूरिजवेन केनचिदवविच्छेदादॢयानेन चे-
दुद्गच्छेत्कुतुकेन कश्चिदवनेः प्राप्तुं भवन्मण्डलम् ।
अब्दा स्युर्गमिताः शतं तनुभृता तेनोत्तरं पञ्चभिः
सन्देहो न मनागपीति कतिचिद्वैज्ञानिकाश्चक्षते ॥ २८ ॥

अत्यन्ताय दविष्ठतामुपगतादित्थं भवन्मण्डला-
दष्टस्वेव भुवं भजन्ति घृणयः पूषन्निमेषेषु ते ।
ज्योतिष्मंस्तव सर्षपायितमिदं कृत्स्नं धरामण्डलं
भौमस्याद्य कृमेर्मम स्तुतिवचः श्रूयेत वा ते न वा ॥

भिन्दानोऽभिनवाम्बुदेभनिवहान्वज्रोपमैरुच्छ्रितैः
पादैः स्फोरितविक्रमैरतिबलालंबाचरिष्णून्पुरः ।
श्यामव्योमवनप्रचारचतुरः स्वैरञ्चकास्त्वद्भुतः
कोऽप्यादित्यमृगाधिपो मम सदा हृत्कन्दराभ्यन्तरे ॥

औष्ण्यात्सङ्कथितान्महाम्बुनिधितो गृह्णन्मयूखैरपो
लोकक्षेमकृते विकर्तन ! घनद्वारा धरां सिञ्चसि ।
दत्से प्राणनशक्तिमम्बरमणे ! त्वं प्राणभृद्भ्योऽवना-
विन्धे मूर्तिमती महत्युपकृतिर्मूर्तिः पवित्रा तव ॥ ३१ ॥

---

मेघपक्षेऽतिबलो वायुः

पृथ्व्यां किञ्चन नोदपत्स्यत विभो ! त्वं नाभविष्योऽर्यम-
न्निष्प्रत्यूहमवक्ष्यदन्धतमसं[1] स्वेच्छाधिपत्यं भुवम् ।
त्वं लोकैकविलोचनं, जगदिदं त्वत्प्रापितप्राणनं
गायत्र्येकरस ! प्रचोदय धियं सत्ये पथीत्यर्थये ॥ ३२ ॥

मेरुं ते परितः प्रदक्षिणमहर्नाथान्वहं क्राम्यतो
भिद्येते उदयाप्ययौ भगवतो दिग्देशभेदादुभौ ।
छान्दोग्योपनिषद्यपि स्फुटमिदं, प्रत्यक्ष्यकुर्वंश्च ये-
केचिन्मण्डलमण्डकल्पमवनेर्यन्तः स्वयं सर्वतः ॥ ३३ ॥

द्योयानेन च कोऽप्युदप्लवत खेऽपश्यत्त्वदीयोदयं
सोऽयं भास्कर ! सप्तकृत्व इति तद्ग्रन्थात्प्रतीमो वयम् ।
माहात्म्यं समजानतास्मदृषयो योगप्रभावेण ते
यस्मात्कश्यप एव पश्यक इति ब्रूते श्रुतिर्नः प्रसूः ॥ ३४ ॥

नैवोदेति नवायमस्तमयते याथात्म्यतोऽहस्करः
किन्त्वेनं परितो भ्रमन्ति पृथिवीमुख्या ग्रहा सर्वदा ।
एषोऽनादिरुपाधिरद्वयपरब्रह्मात्मनोऽनुत्तम-
श्छन्दोगश्रुतिमूर्धसौधशिखरे रत्नप्रदीपः स्थिरः ॥ ३५ ॥

1. अवक्ष्यद्वहतेः लङ्

वर्णानां निचयोऽपि शुद्धहरितोद्रिक्ताः प्रशस्ता भृशं
मध्याह्नार्ककरा निगीर्णमशनं जीवामृतं कुर्वते ।
भुञ्जानाः सकृदेव तत्र समये सन्तः पुरा धार्मिकाः
पर्यष्कार्षुरिमां हि भारतभुवं प्राज्ञाश्चिरञ्जीविनः ॥ ३६ ॥

आरोग्यं ददतामनामयकृमीनावर्धयन्तो वपु-
ष्युस्राः स्पर्शनमात्रतस्तवजगन्नाथस्य पूताःस्वतः ।
प्रातर्भूरिनमस्कृताश्चिरतरं स्वान्ताधिरूढं तमो
ध्वन्त्वाद्यन्तविहीनतामुपगताः खद्योत ! विद्याप्रदाः ॥

नानादिक्षु विभिन्नवर्णसुभगं मत्त्वित्यमर्त्या अपि
ब्रध्न ! त्वां समुपासितुं श्रुतिशिरोवाक्याद्व्रजन्त्यर्हताम् ।
देवानामपि दैवतस्य भवतः प्राप्तुं प्रसादं ममा-
प्यार्हन्ती [1]भवकेति भास्कर ! भवाम्भोधौ निमग्नोऽर्थये ॥

पात्रेणार्क ! हिरण्मयेन विहितं सत्यस्य वक्त्रं परं
पूषंस्त्वं तदपावृणु द्रुततरं मह्यञ्च मार्गार्थिने ।
धर्माद्याचरणेन मे करणमप्याभ्यन्तरं शुध्यता-
त्सोऽहं त्वं त्वमहं मतिस्तवमुहुर्ध्यानेन संवर्धताम् ॥३९॥

1. भवकेत्याशिषि वुन्

अत्रन्नात्मकतानिरूपणमुखात्सार्वात्म्यमाहुस्तरां
प्रश्नाद्याः श्रुतिमौलयः समुदिताः श्रीद्वादशात्मंस्तव ।
त्वद्विश्वं समुदेति, तिष्ठति तथा त्वय्येव संलीयते
त्वय्यध्यस्ततयैव भाति मिहिर ! द्वैतप्रपञ्चः समः ॥

देवानामपि दुर्लभं श्रितवतामङ्कं जनन्या भुवः
सूर्य ! त्वं परिपालकोऽसि जनकः क्रीडार्भकाणाञ्च नः ।
पापाचारपरा अधस्तव वयं किं किं रवे ! कुर्महे
शक्तोऽपि क्षमसेऽपराधमखिलं सर्वंसहेवेह नः ॥ ४१ ॥

जीवानामियदौष्ण्यमत्र समयेऽपेक्ष्यं तथा नेयदि-
त्येतत्सर्वमहस्कर ! त्वमनुचिन्त्यैवर्तुषु भ्राजसे ।
सत्येवं त्वयि दोषमेव जनता द्वन्द्वासहिष्णुर्ब्रवी-
त्यात्माज्ञानमशेषवस्तुषु मृषा दोषं समुद्भावयेत् ॥ ४२ ॥

सन्तापस्तव तारतम्यमयते देशप्रभेदाद्रवे !
घर्मौष्ण्यात्कतिचित्सपद्यमृषतेत्यश्रौष्म शश्वद्वयम् ।
यद्यप्यत्र न दुष्यसि त्वमखिलं कर्मोपभोग्यं तथा-
प्यज्ञास्त्वां प्रवदन्त्यतः प्रियसुहृन्मा भूः प्रचण्डोऽधिकम् ॥

वर्षिष्यन्त्यचिराद् ध्रुवं करिवराकाराश्च धाराधराः
सस्याद्यैर्हृदयं हरिष्यति धरा पुष्णत्यपूर्वां श्रियम् ।
मत्वैवं ह्यसहामहि प्रतिदिनं क्रूरं प्रतापं तव
म्लानानामिह नः क्षुधा भुवि भृशं कामान्द्रुतं पूरय ॥

श्रेयो धर्मफलं स धर्मनिवहोऽनुष्ठित्यपेक्षः स्मृतः
कालापेक्षमनुष्ठितिप्रकरणं कालस्त्वदुत्पत्तिकः ।
सर्वस्यापि निदानमेवमनघं सर्वात्मकं वस्तुत-
स्त्वां ब्रूमः श्रुतिदुग्धवार्ध्यमृतमित्यद्वापरं भास्कर ॥

प्रत्यासन्नतरः स्फुरस्यहिमरुग्यत्त्वं परब्रह्मणः
तस्माद्विदशिरस्त्वयि व्यधित तद्दृष्टिं जगत्स्रष्टरि ।
कामं सन्तु सहस्रशः सुमनसः स्वर्गस्य भाराः परं
त्वामेवाहमहर्दिवं हृदि दधे संसारवार्धेस्तरिम् ॥ ४६ ॥

एकर्षे ! भवतः प्रभावमवनौ को वेद कृत्स्नं नरः
त्वादृक्षा बहवः प्रतिग्रहमपि भ्राजन्त इत्यद्भुतम् ।
व्योमेदं परिशिष्यते बहुतरं दत्त्वावकाशं च वो
द्यौरीशस्य विभूतिलेश इति चेद्विष्णुः स कीदृग्भवेत् ॥

त्वत्सम्प्राप्य महोत्सवं कुमुदिनीजारः समुद्राद्युचां
    सूर्यम्मन्य इव स्वयं विशदयन्नाशा मनागंशुभिः ।
चारित्रात्कुलसुभ्रुवः कति बत ! प्रभ्रंशयामासिवा-
    न्दातारं नियतं भजेत वृजिनं दुस्सम्प्रदानार्जितम् ॥ ४८ ॥

आश्लेक्ष्यन्निव लक्ष्यसे दिनकर ! प्रत्यक्पुरन्ध्रीं करै-
    रुर्वीं काञ्चनवाससेव समलङ्कुर्वद्भिरात्मत्विषा ।
स्पर्धेते ह्यधुना परस्परमुभे द्यौश्चापि विश्वम्भरा
    चेतो हर्तुमहो ! स्वकीयसुषमां पूर्णां समुद्वीर्य नः ॥

फुल्लं मल्लिवनं श्रयन्ति मधुपाः प्रक्रान्तगीतक्रमा
    वात्याहूत इव स्वयं मलयतो वातः शनैरागतः ।
नानादिग्भ्य उपागता द्विजगणा नीडद्रुमानाभज-
    न्त्यम्भोजिन्यपि मन्दमन्दमवशा निद्रां समालिङ्गति ॥

अन्तश्शीतमपीषदुष्णमुपरि व्यामिश्रणात्सौख्यदं
    रोध्रःपाटलपुष्पपातसुरभि स्वच्छं पयो बिभ्रतीम् ।
वापीं स्नातुमुपागताः प्रियतमैर्वासो वसाना मितं
    क्रीडन्त्यप्सु दिनावसानसुभगस्त्वञ्जायताक्ष्योऽन्वहम् ॥

श्रान्तेवोत्प्लवनेन कापि युवतिः शश्वत्समालिङ्गति
प्रेम्णा नेत्रनिमीलनाभिनयनव्यग्रा परं कामुकम् ।
ऊरुभ्यामुपगूह्य तां स च युवा यत्नाज्जलाभ्यन्तरे
सामाथ्र्यात्परिदर्शयत्यह ! बहिस्सम्मत्यभावं परम् ॥

बुध्वाप्यन्यपुरन्ध्रिमेकतरुणो वस्त्रस्य सारूप्यतो
भ्रान्तिं प्राप्त इवालिलिङ्ग सुदृढं पश्चादुपेत्यादरात् ।
जानानाप्ययमन्य इत्यसकृदुद्भूतोरुरोहोद्गमा
स्वैरं साभिनिनाय नायकधियं पश्चाददृष्टोक्तिभिः

प्रेयान्मे प्रवसत्यनेकशरदो हित्वा रसज्ञामिमां
कामं कामशरार्दिताहमनयं रात्रीश्च बह्वीरिति ।
कस्मैचिन्न निगद्यतां सखि! दयाहीना युवानो बते-
त्यूचे काचन वामदृक्स्मरसमं कञ्चिद् दृशा बध्नती ॥

नृणामीदृगधर्मवर्त्मचरणं सर्वं विगीतं सतां
माहं दर्शमिति त्रयीमय ! तिरोधत्सेऽस्तपृथ्वीधरे ।
मित्राभ्रीततरामसौ शशधरो रात्रावुदेष्यन्करैः
स्त्रीपुंसव्यतिचङ्क्रमो न भवितेत्याख्यातुमीष्टेऽत्र कः ॥

किं तप्तायसपिण्ड एष जलधिं शुष्कं विधातुं पत-
त्याहोस्वित्प्रकृतेश्शिरोमणिरयं नृत्यात्स्वयं प्रच्युतः ।
किं वा मूर्ततरोऽनुरागनिकरो नङ्क्ष्यन्प्रतीच्याः स्त्रियः
किं वा पुण्यफलं महत्परिणतं सत्कर्मिणां द्योमणे ॥

यस्मिन्नात्मरुचं निधाय दययास्मासु, स्वयं लीयसे
वह्निं त्वामिव तं भवत्प्रतिनिधिं सत्कुर्महे भक्तितः ।
सन्ध्यायामुषसो वितीर्य भगवन्नर्घ्यंश्च वज्रोपमं
मन्देहानसुरान्निरस्य तरसा प्रत्युद्व्रजामः पुरा ॥ ५७ ॥

साक्षाच्छ्रीपुरुषोत्तमोऽपि जगतां क्षोभं भृशं तन्वतो
निश्शेषं विनिहत्य सायकगणै रक्षोधिपस्यान्वयम् ।
धर्मान्स्थापयितुं त्रयीनिगदितानाचर्य भूम्यां स्वयं
पूते तेऽवततार वंशजलधौ श्रीरामचन्द्रात्मना ॥ ५८ ॥

श्रद्धाभक्तिसमन्विताय मरुतः पुत्राय मेधाविने
दिव्यं व्याकरणं ह्युपादिश इति प्राहुर्महान्तः समे ।
मह्यं नित्यमुपासकाय वितर ज्ञानं सुशब्दार्थयो-
श्छित्त्वा येन च कर्मबन्धमखिलं यायां त्वदीयं पदम् ॥

रोगं संहर सर्वमीश्वर ! दृशोः शक्तिं प्रदीप्तां कुरु
श्रीमन्नर्क ! धृतिं हृदि स्थिरतरां प्रज्ञाञ्च लोकोत्तराम् ।
विप्रायानुगृहाण सूक्तिममृतस्रोतस्विनीस्पर्धिनी-
माकल्पं जयतात्प्रभाकर ! कृतोऽस्माभिः प्रभावस्तव ॥ ६० ॥

श्लोकानामिह षष्टिरेकसहिता मार्ष्टु श्रियं शाश्वतीं
सम्पत्तिं शुभसन्ततिं वितरतादादित्यभक्तिं पराम् ।
सन्तः प्राप्तसुखा भवन्तु सततं सूर्य ! प्रसादेन ते
वाचामस्तु फलेग्रहिः समुदयो लोके कवीनां सताम् ॥

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
प्रभाकरप्रभावो नाम सप्तमो विलासः ।

श्रीः

# प्रकृतिविलासकाव्ये

## शर्वरीसौन्दर्यं नाम

## अष्टमो विलासः

भूत्यै भूयात्तुहिनमहिभृत्कन्यका तन्यमान-
क्रीडं डिम्भं द्विरदवदनं लालयन्ती निजाङ्के ।
शर्वर्यात्मा प्रलयसमये संहरन्ती प्रकोपा-
द्व्याजीकृत्य त्रिपुरजयिनं स्वीयशक्त्यैव सर्वम् ॥ १ ॥

कृत्स्नां रात्र्याः श्रियमिह गिरां दूरतो वर्तमानां
पृथ्व्यां मादृक्कथमिव कविः स्तोकवाग्वक्तुमीशः ।
चित्रं ह्येतत्कविकुलयशोलिप्सया वञ्च्यमाना
मर्त्याः केचित्कथमपि विदुर्नात्मनः शक्तिमल्पाम् ॥ २ ॥

सौन्दर्याविष्करणविषये तुल्यरूपास्त्रियामा
भेदो नात्र स्फुरति सुहृदां पक्षयोश्च द्वयोर्नः ।
जाग्रत्यां श्रीप्रकृतिविहृतौ व्यञ्जयन्त्यां परेशं
किं वा कर्तुं प्रभवतु भवन्केवलं वर्णभेदः ॥ ३ ॥

ताम्रैरभ्रैः स्फुरति परितः पुष्करञ्च प्रदोषे
यान्त्यावासान्प्रति सुरभयो वत्ससन्दर्शनोत्काः ।
स्निग्धां श्लिष्यत्यमितकुतुकात्पद्मिनीं मन्दनिद्रा
दीपान्न्यस्यन्त्यधिगृहमुखं रम्यवेषाश्च योषाः ॥ ४ ॥

फुल्लं मल्लीवनमळिकुलैर्व्याप्तमालापशीलैः
पत्त्रिव्रातैर्मधुरविरुतैराश्रिताश्शाखिनीडाः ।
वातः पोतस्सुखयति सरित्प्रान्तवन्यां विहारी
पांसुक्रीडापरवशहृदो बालका वासरान्ते ॥ ५ ॥

रोधस्सिन्धोः कतिचन, परे हृद्यमुद्यानमन्ये
स्रोतस्विन्याः पुलिनमितरे तुङ्गशैलेन्द्रशृङ्गम् ।
इत्थं स्वस्वाभिमतयुवतीसार्थमानीय यूनां
स्तोमः कामं मलयमरुतं सेवते वासरान्ते ॥ ६ ॥

मुष्णन्क्षोण्यास्तरणिकिरणोद्गीर्णमौष्ण्यं क्रमेण
प्राणान्पुष्णन्विचरति मरुद्रौहिणारण्यशीर्णः ।
आराद्धुं श्रद्दधति विधिवद्भूसुराद्याश्च सन्ध्या-
मच्छिन्नश्च झणझणरवो व्यज्यते झिल्लिकानाम् ॥ ७ ॥

श्रीमत्येषा प्रकृतिरमितप्राभवा भ्राजमाना
त्रैगुण्येन, प्रथयितुमनास्तामसीमात्मशक्तिम् ।
बिभ्रत्याख्यां रजनिरिति च, स्वैरमावृत्य विश्वं
क्रीडत्युच्चैः किमु सहृदयान्विभ्रमै रञ्जयन्ती ॥ ८ ॥

तेनोऽभावस्तम इति मतं धीमतां नादरार्हं
नीचाङ्काङ्क्षितिस्थितिमुपगतं तेज एवान्धकारः ।
मान्द्यामान्द्ये अपि च तमसस्सङ्घटेते क्रमादि-
त्याहुर्निद्रापरमिह बुधा वस्तुतत्त्वं विदन्तः ॥ ९ ॥

रम्या रात्रिः परमगुरुणा सुन्दरिम्णा निगीर्णा
सन्ध्याभ्यामप्युपचितरुचिस्सेव्यमाना सखीभ्याम् ।
बाह्यव्याप्त्युपरतिकृतं विश्रमं द्राग्दिशन्ती
कस्य प्रीत्यै न भवति समान्प्राणिनः पुष्णतीयम् ॥ १० ॥

सूर्यस्सोऽयं न खलु सहते स्वेतरेषां प्रकर्षं
यत्तैर्घृण्याद् भृशमभिभवत्यह्नि नक्षत्रलक्ष्म् ।
[1]तेभ्यो भातुं वितरति यथेच्छं तमिस्रावकाशं
द्रष्टुं प्रायः परपरिभवं न क्षमेरन्मृगाक्ष्यः ॥ ११ ॥

---

गुणभूतानामपि नक्षत्राणां तच्छब्देन परामर्शः

द्यावाभूमी स्वरुचिनिचयैरञ्जनप्रत्यनीकैः
    सान्द्रस्निग्धैस्सरभसमभिव्याप्य गाम्भीर्यभूम्ना ।
विश्वस्योपर्यपरिमितमुत्सेकतोऽनन्तर यं
    निर्वोढुं श्रीः स्फुरति रजनेराधिपत्यं समस्याः ॥ १२ ॥

आवृण्वानाप्यविरळतरैः श्यामळिम्नां समूहै-
    र्नेत्राणि द्राग्भुवि तनुभृतां दुष्यतीयं न रात्रिः ।
तत्तद्भावाश्रयमधुरिमस्तोमकुक्षिम्भरित्वा-
    त्पुष्यत्येषात्मनि हि सुषमां कामपि प्रीतये नः ॥ १३ ॥

आस्तां दूरादनुपमसमाम्नायगम्योऽर्थमायं
    तस्माल्लब्धद्युतिरपि विधुर्यामवत्या रसज्ञः ।
अब्धेर्मेघोऽप्यधिगतरसो विद्युतं श्लेष्टुमीष्टे
    स्त्रीणां प्रीत्यै भवति रसिको, नैव माहात्म्ययुक्तः ॥

सौन्दर्योद्गार्यपि न तिमिरं शार्वरं रोचयन्ते
    मर्त्याः प्रायस्स्वयमधिनिशं संविशन्ति श्रमेण ।
रात्र्यां सर्वा प्रकृतिविहृतिर्वन्धुरा निष्फलैषां
    नानर्थाय प्रभवति तमो बाह्यमन्तस्तमोवत् ॥ १९ ॥

स्वत्वेन द्योरभिमततमं नीलिमानं मनोज्ञं
दिग्योषिद्भ्योऽञ्जनविधिकृते संविभज्य प्रदातुम् ।
कारुण्येन प्रकृतिरनघा यामिनीं किं नियुङ्क्ते
रिक्तात्मानः किमपि न दिशन्त्यन्तरेणापहारम् ॥ १६ ॥

ऋक्षैः प्रेक्ष्यैस्तरळतरळद्योतमुक्तासगोत्रै-
र्व्योम्नि श्यामे निचुळिततमे सान्द्रमुच्चैर्विताने ।
तुङ्गं रङ्गस्थलमिव भुवो गोलमाक्रम्य मूर्त्या
श्यामा काचित्कलयति मुदं नर्तकी श्रीर्निशायाः ॥ १७ ॥

अभ्रं कम्रं निबिडमुडुभिर्मल्लिकल्पैरनल्पै-
र्देव्या रात्र्याश्शिथिलमतुलैर्नर्तनैः किन्नु कैश्यम् ।
उद्यानं किं कुसुमिततमं, मण्डितं पुण्डरीकै-
र्निर्मर्यादं प्रकृतिकलितं किं सरः क्रीडितुं स्यात् ॥ १८ ॥

तारामुक्ताप्रकरमधुराद्व्योमनाम्नोऽस्तसीम्नः
सौन्दर्याब्धेरनुपमरसं कण्ठदघ्नं पिबन्ती ।
उच्चस्थानादतिगुरुतया सम्पतन्ती समन्ता-
न्माला कापि स्फुरति नु तमश्छद्मना वारिदानाम् ॥ १९ ॥

कातर्येणार्यमघृणिभुवा गह्वरोर्वीरुहादा-

वन्तर्लीनान्सरभसमहन्यन्धकारार्भकान्स्वान् ।

आश्लिष्यैषा व्रजति रजनिर्निर्वृतिं कामपि द्रा-

ङ्मातृप्रेम्णः किमपि न परं श्रेयसे कामनार्हम् ॥ २० ॥

प्रत्नत्वेनाञ्जनपरिचयाच्छ्यामळस्निग्धमूर्तिः

सान्द्रा कालायसकृतबृहच्छृङ्खलामालिका या ।

सन्धातुं द्यामपि वसुमतीं कल्पिता श्रीप्रकृत्या

सैवास्माकं स्फुरति परितश्शर्वरीकैतवेन ॥ २१ ॥

अब्धेरूर्मीन्मदशिखिगळश्यामळिम्नाह्नि लक्ष्या-

नात्माद्वैतीकरणनिपुणा दर्शयन्ते तमिस्राः ।

निर्मर्यादान्द्विरदनिकरानञ्जनाद्रिव्रजाभा-

न्नातिश्वेतैरभिनिपततः फेनपुञ्जै रदौघैः ॥ २२ ॥

झञ्झावातव्यतिकृतसमुत्तुङ्गभङ्गोत्तमाङ्गा

पर्युक्षिप्तानृजुतरबृहत्फेनदंष्ट्राकराळा ।

विष्वग्व्यासासितघनकचा दुश्श्रवैरट्टहासैः

काली रात्रिर्धृतिमपहरन्त्यम्बुधौ नृत्यतीव ॥ २३ ॥

प्रक्रीडद्भिर्बहु, सरिदधीशानरङ्गे मरुद्भि-
नीलैर्वस्त्रैः क्वचिततनूः फेनपुष्पावतंसाः ।
सम्भूयोच्चैःकृतरुततीर्वीचिकाख्याः पिशाची-
र्यामिन्येषा परमरसिका नर्तयत्यात्मतृप्त्यै ॥ २४ ॥

सिन्धुस्सोऽयं परमकृपया प्रेरितो यामवत्या
गौराङ्गाभ्यस्समुचिततमान्वल्लभाभ्यस्सरिद्भ्यः ।
श्यामांश्चीनांशुकसमुदयान्राजतैस्तन्तुजालैः
प्रोतप्रान्तानह ! कलयते फेनिलोर्मिच्छलेन ॥ २५ ॥

देव्या रात्रेरविरळतमःकन्दळीभिर्निगीर्णः
फेनावळ्याः खलु धवलिमा दृष्टनष्टात्मनोऽब्धौ ।
व्याप्तेऽत्यन्तं हृदयकुहरे तीव्रमोहान्धकारै-
र्नातिस्वच्छां भृशमनुकरोत्यस्थिरां सत्ववृत्तिम् ॥ २६ ॥

अद्रेस्तुङ्गं शिखरमधिरुह्यात्मना चेत्क्षपायां
प्रेक्षेत श्रीप्रकृतिविहृतिं ज्ञातुमेकस्समन्तात् ।
धीरश्शब्दान्कति स शृणुयात्स्वात्मसंवादशीला-
न्पश्येद्भावानपि कतिविधाँल्लोचनासेचनोत्कान् ॥ २७ ॥

स्रोतस्विन्योऽवनिधरगुहाभ्यन्तरेभ्योऽभिरामा
निष्क्रामन्त्यः स्थपुटितदृषत्प्रान्तपातप्रणादाः !
वेगाद्राशीञ्शिशिरपृषतामुत्किरन्त्यस्समन्ता-
न्नक्तं व्यक्तेतरसितपटास्तारदीर्घास्स्रवन्ति ॥ २८ ॥

श्रेणीबद्धक्षितिधरततेरन्तराळावकाशा-
नापूय द्राङ्निबिडिततमःकज्जलेन क्षपेयम् ।
निच्छिद्रामुच्छ्रिततरमहाभित्तिमेकामिवेक्ष्या-
माकल्प्योच्चैः प्रकटयति नः स्वं हि गम्भीरिमाणम् ॥ २९ ॥

भ्राम्यद्भूरिद्विपपरिवृढस्फारफीट्कारमाल-
कुध्यत्सिंहस्वनभरसमुधत्प्रतिश्रुद्गुहौघः ।
श्रोत्रप्रान्तप्रियसुहृदविच्छिन्नझिल्लीविरावः
शैलः स्वान्तं हरति सहृदां हन्त ! भावैर्निशीथे ॥ ३० ॥

वातव्रातोद्धुतमहिरुहान्योन्यसङ्घर्षजन्म-
प्रोच्चण्डार्चिर्दहुतभुजः पारिराजास्त्रसन्तः ।
धूमस्तोमानुपरि समुपारोहतो नक्तमद्रौ
दन्तिभ्रान्त्योद्यतपदयुगास्सञ्जिहीर्षन्ति सद्यः ॥ ३१ ॥

कान्तारश्रीर्घनतमतमोमेचकाच्छादनेन
    च्छन्नात्यन्तं कनकपृषतश्रीकखद्योतभासा ।
नक्तञ्जाग्रत्कतिपयसुमस्तोमदीव्यद्वतंसा
    पुष्णात्युच्चैरचलकुचभाक्चन्दना नन्दथुं नः ॥ ३२ ॥

नैरन्तर्यं व्रजति चरतां झाङ्कृतिर्मारुतानां
    पुञ्जीभूताश्शलशलरवान्कुर्वतेऽनार्द्रपर्णाः ।
मण्डूकौघा ढूणढणगिरः श्रद्धयाऽऽवर्तयन्ते
    कर्णावुद्वेजयति कटुभिर्धिक्कृतैर्घूकसङ्घः ३३ ॥

निश्शङ्कं स्वैश्शिशुभिरभितश्शाखिमूलं हरिण्यः
    शष्पैर्बालैर्निचुळिततमं संविशन्ति क्षपायाम् ।
स्कन्धाग्रेभ्यश्शकुनिभिरभिव्यामगर्भाः कुलाया
    डोलाकल्पा मलयमरुता लम्बमानाश्चलन्ति ॥ ३४ ॥

तोयाधारश्शमयति [1]संमोऽभ्यागतानां पिपासां
    दुष्टानामप्यमितमृगयायासितानामुदस्रास् ।
व्याघ्रादीनाममृतमधुरैर्वारिपूरैः प्रसन्नः
    सन्तः श्रान्तेष्वतिथिषु भिदां नाद्रियेरन्कदापि ॥ ३५ ॥

---

1. समः = सर्वः ।

ज्योतिर्वल्लीकबलिततमःकन्दळा कापि भागे
व्यक्ताव्यक्तद्रुमगिरिसरित्सन्निवेशा परत्र ।
दर्शं दर्शं हसति नु दिवं मेदुरारण्यभूमि-
र्विद्युद्विद्योतितबहुविधाकारधाराधराढ्याम् ॥ ३६ ॥

रोधस्यब्धेश्शिखरिशिखरे वाथ बद्धानगारा-
न्प्रत्यग्रानुच्छ्रिततरशिरस्सद्मदीव्यत्पताकान् ।
अध्युष्य स्त्रीपृथुकसहिता मोमुदत्यस्तिमन्तो
दृष्ट्वा नावः स्वदळितजलालक्ष्यदीपप्रकाशाः ॥ ३७ ॥

द्योयानानि प्रबलमकराकारदृश्यानि यन्त्र-
प्रत्यकृत्यद्रुततरपरिभ्रान्तपार्श्वच्छदानि ।
क्षुद्रैर्दीपैः श्रुतिपुटकटुध्वानधीराणि रम्या-
ण्यारुह्यैके प्रकृतिसुषमां वीक्षमाणा डयन्ते ॥ ३८ ॥

विद्युच्छक्तिप्रभवरुचिभिर्दीपसङ्घैस्समन्तात्
स्फीतालोकाः प्रतिपुरमहोनिर्विशेषा रजन्यः ।
क्रेतृव्रातारवमुखरिताः पण्यवीथ्योऽतिदीर्घा
रथ्यास्सन्निधिष्वसमसुषमाः कृत्रिमारामभूम्ना ॥ ३९ ॥

यूनोऽन्यूनानदृढहृदयानञ्जसाऽऽक्रष्टुकामाः
कर्णाभ्यर्णप्रचरणचणैराकरैर्विभ्रमाणाम् ।
नेत्रैर्नीलाञ्जनपरिचितैर्वारयोषास्सुवेषा-
स्तिष्ठन्त्यस्तत्रपमधिगृहद्वारमीषद्विहासाः ॥ ४० ॥

आयस्यन्तोऽप्यहनि निपतत्कालपाथःपृषत्कं
विश्राम्यन्ति स्वयमधिनिशं मोदमानाः कुटुम्बैः ।
मेदोवृद्ध्या मुदितहृदया निश्चलन्तोऽस्तिमन्त-
श्चिन्ताक्रान्ता बत ! कतिपये नैव निद्रां लभन्ते ॥ ४१ ॥

श्लिष्टं स्निग्धैर्मुरजनिनदैर्गीतमेकत्र रात्रौ
वंशीकृत्यं क्वचिदपरतो नर्तनं वारनार्याः ।
दाण्डाः क्रीडाः क्वचन विविधास्सत्कथानां प्रसङ्गा
इत्थं नित्योत्सवबहुमितं पत्तनं किन्न रम्यम् ॥ ४२ ॥

भक्त्युन्मेषादिव समुदिता देवतासन्निधाव-
प्येके ध्यानाभिनयकुशलाः कामयन्ते कुलस्त्रीः ।
अन्ये सम्मर्दनकुतुकिनः स्वप्रमादच्छलेन
त्यक्त्वा लज्जां स्मरपरवशाः स्त्रैणमभ्यापतन्ति ॥ ४३ ॥

अन्योच्छिष्टं मधु कुतुकतः सम्पिबन्तो मदान्धाः
स्वैरं स्त्रीणामपि विनिमयादक्रमानेकनृत्याः ।
सद्यो रङ्गस्थलविलसितान्हन्त ! निर्वाप्य दीपां-
स्तिर्यक्कृत्यं विदधति समे निस्त्रपा ह्यन्यदेश्याः ॥ ४४ ॥

विद्युद्दीपव्रजभृदुदरोद्भासिनैकासनस्थ-
प्रान्तप्रेक्षोत्सुकजनशिरश्श्रेणिदीव्यद्गवाक्षा ।
उल्लङ्घ्य द्राग्वनगिरिनदीर्धूमिता यानपङ्क्ति-
र्देशाद्देशं गुफुगुफुरवैरायसे याति मार्गे ॥ ४५ ॥

प्रासादांश्च प्रतिपुरवरं चन्द्रिकासारगौरा-
न्रम्यान्वातायनपरिसरास्तीर्णमञ्चप्रपञ्चैः ।
अध्यास्यैकेऽभिमतयुवतीस्स्पर्धिनीस्स्वर्वधूभि-
र्भुञ्जाना भान्त्यशिथिलपरीरम्भसंरम्भभाजः ॥ ॥ ४६ ॥

गाढाश्लेषं कलयितुमनाः कामिनीनां रसज्ञो
देव्या मध्याः शिखरिणि करैः सत्वरं व्याप्टतैः स्वैः ।
पश्येन्दुर्द्राग्दलयति तमःकञ्चुकं प्राणनाथे-
त्युक्त्वा सद्यः पुलकिततनुः सुस्तनी कापि जाता ॥ ४७ ॥

कापि स्वापाभिनयचतुरा शश्वदाकारितोच्चैः
पत्या निर्यत्स्मितमपि बलात्सन्नियम्य स्थितान्ते ।
ईषत्स्पर्शोदितपुलकितज्ञाततत्वं स्वदोर्भ्या-
माश्लिष स्मरशरहताभुग्नवक्षोजयुग्मम् ॥ ४८ ॥

द्यूतं कृत्वा दृढतरपरिष्वङ्गमुत्तुङ्गहर्म्ये
शुभ्रज्योत्स्ने व्यवहृतिकथां दम्पती प्रारभेताम् ।
भर्ता रामं कथयति समेप्वेकदारं रसज्ञ
भार्या गोपीहृदयहरणव्यग्रलीलञ्च कृष्णम् ॥ ४९ ॥

वेणीमल्लीसुमपरिमळभ्राम्यदिन्दिन्दिराणां
वारस्त्रीणां युवजनमनोहारिभिर्दृग्विलासैः ।
धन्यम्मन्याः कतिचन समारुह्य नौकाः प्लवन्ते
निर्निद्रेन्दीवरनिचुळितास्वप्सु लीलासरस्याः ॥ ९० ॥

प्रायो व्यर्थं भवति रजनौ ग्राममानोज्ञकं, य-
त्सर्वे वृत्ताभ्यवहृतितया संविशन्त्याद्ययामे ।
रथ्यायाञ्च व्यपगतभयं फेरवस्सञ्चरन्ति
श्वानो धावन्त्यसकृदभितो निर्निमित्तं भषन्तः ॥ ९१ ॥

सत्यप्येवं विमलमनिलं सर्वतश्चेक्षुसार-
स्पर्धीन्यम्बून्युचितमशनं भङ्गहीनां सुषुप्तिम् ।
लब्ध्वा चिन्तालवविरहिताः स्वस्वकृत्यानुरक्ता
जीवन्त्यब्दाञ्शतमपि समे ग्रामवासेन धन्याः ॥ ५२ ॥

यामैर्युक्तां समभिदधते सत्रिमेके चतुर्भि-
र्मर्त्याः कृत्यप्रणिहितधियः सञ्चरन्त्याद्ययामे ।
क्रूरात्मानः फणधरमुखा जन्तवश्च द्वितीये
यक्षा रक्षांस्यपि बहुतरैः क्षुद्रकृत्यैस्तृतीये ॥ ५३ ॥

आगच्छन्तः पितृभिरमितप्राभवैर्देववर्या-
स्तुर्ये यामे गजमुखमुखाः क्षेममाधातुकामाः ।
सर्वान्दृष्ट्वापि च सदनिनो बुध्यमानान्कुटुम्बै-
स्तृप्तात्मानो विदधतितमामाशिषो द्रागवन्ध्याः ॥ ५४ ॥

सर्वे श्वासश्वसनगरळं प्राणिनामह्नि पीत्वा
छायावृक्षा बहिरतिजवादुद्गिरन्ति क्षपासु ।
[1]ग्रस्त्वा दुष्टं मरुतममितं तृप्यतां शाखिमूलं
सेवायोग्यं भवति फणिनां, मानवानां तु गर्ह्यम् ॥ ५५ ॥

---

1. उदितो वेति क्त्वायां वेट्

अण्डेभ्यश्च द्विजनय इव प्राणभृद्भ्योऽसवो द्रा-
गुत्क्रामन्ति स्वयमिह भुवि प्रायशोऽत्रैव यामे ।
तार्तीयीके भयकृति निशोऽत्यन्तमित्याहुरेके
सन्दर्भोऽयं भवति हि महान्दारुणो रोगभाजाम् ॥ ५६ ॥

श्वानो यस्यां निशि नियमतस्तन्वते स्वोपवासं
रात्रिं प्राहुः श्वनिशमिति तां केचनाचार्यपादाः ।
साक्षात्कुर्वन्त्यपि च रजनावागमं सूर्यसूनोः
श्वानः कृष्णा इति च गदितं प्राणितत्वं विदद्भिः ॥ ५७ ॥

सर्वेभ्यः श्रीरजनिजननी सुप्तिमात्मस्वभूतां
जीवात्मभ्यः परचिति परिष्वङ्गमापादयन्तीम् ।
हित्वा भेदं सपदि ददती पुष्णती चार्भकान्नः
सैषा नित्या श्रुतिषु महितैः स्तूयते रात्रिसूक्तैः ॥ ५८ ॥

रम्यश्चन्द्रस्तदुदरभवं लाञ्छनञ्चापि रम्यं
ज्योत्स्ना रम्यावनिपरिसरे तत्प्रसारोऽपि रम्यः ।
रम्यास्त[1]म्यः सरसमनसामन्धकारोऽपि रम्यः
किन्नैकोक्त्या प्रकृतिविहितं वस्तु नैवास्त्यरम्यम् ॥ ५९ ॥

---

1. तमी = रात्रिः

स्त्रीपुंसाभ्यां जनयसि जगन्मातरेतत्समाभ्यां
निद्राद्वारावसि करुणयारोग्यमुत्पाद्य भूयः ।
अन्ते सर्वं हरसि भगवत्युग्रसंवर्तरात्रिः
कुत्रास्माकं पततु भवतीमन्तरेण प्रणामः ॥ ६० ॥

मृत्युं मह्यं तिरय कृपया मातरुत्सङ्गभाजे
पाप्मौघं मे सफलय रिपुष्वार्यगृह्येतरेषु ।
आकल्पं सद्द्विजवरकृतं विद्वदाकल्पकल्पं
श्रीशर्वर्या जगति जयतादत्र सौन्दर्यमेतत् ॥ ६१ ॥

---

इति महामहोपाध्यायस्य श्रीकृष्णमूर्तिशास्त्रिणः पण्डितराजस्य
मद्रप्रान्तसंस्कृतास्थानकवेः कृतिषु
प्रकृतिविलासकाव्ये
शर्वरीसौन्दर्यं नाम अष्टमो विलासः ।

Bharatiya Vidya Bhawan's Sri Sankaracha... Mahavidyalaya

## ॥ कपर्दिनि समर्पणम् ॥

---

काट्टुप्पुत्तूरुवास्तव्यस्वाम्यार्यस्याहमात्मजः ।
कृष्णमूर्तिरकुर्वीमां मद्रास्थानकविः कृतिम् ॥ १ ॥

पद्वाक्यप्रमाणज्ञं श्रीगर्भपुरवासिनम् ।
भूवराहाचार्यवर्यमादिमं नौमि देशिकम् ॥ २ ॥

महामहोपाध्यायाञ्श्रीदण्डपाणिमखीश्वरान् ।
करुङ्गुळंकृष्णशास्त्रिवरेण्यान्नौमि सद्गुरून् ॥ ३ ॥

अम्मङ्गुडिस्थितश्रीमत्परमेश्वरशास्त्रिणः ।
गुरून्पाणिनिशास्त्राब्धेर्नौम्यहं कुम्भसम्भवान् ॥ ४ ॥

येषाममीषां महतां करुणादृष्टिपाततः ।
महामहोपाध्यायोऽस्मि सवृत्तो नौमि तान्गुरून् ॥ ५ ॥

आपो वह्निश्च होता विधुरहिमकरौ व्योम पृथ्वी नभस्वा-
नेतेऽष्टौ यस्य देहाः स पशुपतिरपि श्रीनिवासस्वरूपः ।
यस्य श्रीकृष्णमूर्तेः कुलममलमवत्सङ्घिश्वासस्य नित्यं
सोऽयं विप्रः कपर्दिन्यवधत्कृतिमिमामर्पयत्यात्मतृप्त्यै ॥ ६ ॥

Bharatiya Vidya Bhavan's
787

19529.

## ॥ आशासनम् ॥

---

मनः प्रसादं संप्राप्तो वेङ्कटेशप्रसादतः ।
श्रीराजेन्द्रप्रसादोऽसौ जीयात् भुवि जनाधिपः ॥

आने-देश्मुख-खड्जु-मुन्षिनयविच्छ्रीराजमन्नार्मुखा
मान्यास्संस्कृतमातृकिङ्करतया दीव्यासुरब्दाञ्शतम् ।
राजाजी-जवहर्-पटेल्प्रभृतिभिः स्वातन्त्र्यसंरक्षकैः
माता भारतभूमिरुत्तमतमैः पुत्रैर्विजेजीयताम् ॥

श्रीमद्भवनगर्राजदम्पती च जयन्त्विमे ।
कुमारस्वामिराजश्च विद्यामन्त्री च माधवः ॥

---

इति श्रीभारद्वाजकुलजलधिकौस्तुभश्रीमद्वेङ्कटसुब्बरामार्य-
वर्यतनूजस्य श्रीवेङ्कटसुब्बलक्ष्मीगर्भसम्भूतस्य
व्याकरणवेदान्तसाहित्यनिष्णातस्य पण्डितराजाद्यनेक-
बिरुदाङ्कितस्य महामहोपाध्यायस्य
मद्रप्रान्तसंस्कृतास्थानकवेः
कृष्णमूर्तिशास्त्रिणः कृतिषु
प्रकृतिविलासः समाप्तः

ॐ तत्सत्

जय हिन्द

19529.

श्रीकल्याण मुद्रालयः, तिरुची ।

# ERRATA

| Page | | line | | for | read. |
|---|---|---|---|---|---|
| xvi | ... | 8 | ... | सुखम | सुर |
| 9 | ... | 6 | ... | मभ्यण | मभ्यर्ण |
| 12 | ... | 1 | ... | गृह्णन्नणस्स | गृह्णन्नर्णस्स |
| 14 | ... | 4 | ... | प्रेयांस | प्रेयांसं |
| 16 | ... | 10 | ... | संदशनेन | सन्दर्शनेन |
| 31 | ... | 13 | ... | मसृणाङ्कना | मसृणाङ्ककानां |
| ,, | ... | 14 | ... | माक्रीडतां | प्रक्रीडतां |
| 35 | ... | 5 | ... | द्रिमूधानं | द्रिमूर्धानं |
| 37 | ... | 4 | ... | क्षीरनिरतम् | क्षीरविरतम् |
| 38 | ... | 6 | ... | पुष्यद्भ्रतति | पुष्यद्व्रतति |
| 44 | ... | 6 | ... | विच्छेदाद् | विच्छेदा |
| 50 | ... | 4 | ... | पितोपमः | पितेव मे |
| 54 | .... | 11 | ... | मरून्विनि | मरुद्विनि |
| 55 | ... | 5 | ... | कुसुमसुभगा: | कुसुमसुभगाः |
| | .... | 10 | ... | भ्राम्यद्भृगन्त | भ्राम्यद्दगन्त |
| 59 | ... | 7 | ... | सरसीसुतैः | सरसीसुतैः |
| 61 | ... | 14 | ... | वितीय | वितीर्य |
| 62 | ... | 11 | ... | खमिळन | स्वमिळन |
| | ... | 12 | ... | भवन्त्सुप | भवन्त्युप |
| 66 | ... | 1 | ... | दनघ | दनघं |
| 69 | ... | 1 | ... | रवः | रव- |

DATE DUE

Class No. ________ Book No. ________

Accession No. 980

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.

| | | | |
|---|---|---|---|
| 110 | ... | | रोमोद्गमा |
| 111 | ... 16 | ... ...त्वा | इछित्त्वा |
| 116 | ... 3 | ... ऽनन्तर यं | ऽनन्तरार्यं |
| ,, | ... 14 | ... मर्त्या | मर्त्या: |
| 120 | ... 7 | ... निच्छिद्रा | निश्छिद्रा |
| ,, | ... 10 | ... प्रतिश्रुद्गुहौघः | प्रति...गुहौघः |
| 121 | ... 8 | ... कटुभिर्धिक्कृतै | कटु... |
| 124 | ... 10 | ... रास्त्रीर्ण | रास्तीर्ण |
| 126 | ... 16 | ... गह्यम् | गर्ह्यम् |

RVB Sri Sankaracharya Sanskrit Mahavidyalaya
787